A.C. Joshi Library
P.U. Chandigarh

MSS No. 190 Subject Philosophy

Name of MSS तर्कसंग्रहदीपिका Tarkasangrahadipikā

Author - -

Period - - Folios 43

Script Sanskrit Source Prithipal Singh, Amritsar

Missing Folios - -

पदार्थान्विभजते नन्वँ सामान्यज्ञानस्य विशेषज्ञाने प्रतिहेतुत्वात् सामान्यतः पदार्थलक्षणं विना प्रथमतः प
दार्थविशेषकथनं क्रमविरुद्धमिति चेन्न पदार्था इति पदेन पदार्थसामान्यलक्षणस्योक्तत्वात् कथं पदस्यार्थः
अभिधेयो ज्ञेयो वा वाच्यो वा तथा च अभिधेयत्वं वाच्यत्वं वा पदार्थसामान्यलक्षणमिति ननु विभागशाह्नानाष्ट्वं मन्वे
नलक्षणप्रतिपादकशास्त्रस्य पश्चात्स्तेन न तद्दोषः तदवस्थ एवेति चेन्न पाठक्रमादर्थक्रमस्य बलवत्त्वेनार्थक्र

द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः सप्त पदार्थाः

मेण पाठक्रमस्य त्यक्तत्वात् तत्र द्रव्यत्वादीनि त्रीणि जातयः सामान्यत्वादीनि चत्वारि उपाधयः ननु प्रथमतो द्र
व्यपदार्थोद्देशे किं नियामकमिति चेत् उद्देशक्रमे सर्वत्रेच्छाया नियामकत्वात् द्रव्यपदार्थ
स्य सर्वपदार्थाधारत्वाच्च ॥ ॥

147

त॰टी॰
२

उद्देशक्रमानुरोधेन द्रव्याणि विभजते तत्रेत्यादिना तत्राकाशत्वकालत्वदिक्त्वानामुपाधयः अन्यानि जातयः त
था च सूचिकटाहन्यायेन प्रथमं तत्राकाशत्वाद्युपाधिकथनमिति भावः उद्देशक्रमानुरोधेन द्रव्यं विभज्य गुणा
न्विभजते रूपेत्यादिना तत्रेति संख्याने द्रव्यादिसप्तपदार्थमध्ये गुणाश्चतुर्विंशतिरित्यन्वयः तत्र रूपत्वादीनि सर्वा

तत्र द्रव्याणि पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नवैव रूपरसगंधस्प
र्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वस्नेहशब्दबुद्धि
सुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्काराश्चेति चतुर्विंशतिर्गुणाः ॥ ॥

ण्येव जातयः ननु सामान्यतो गुणलक्षणमनुक्त्वा प्रथमतो विभागकथनमयुक्तमिति चेन्नाह गुणा इति
गुणत्वजातिमन्तो गुणा इति निर्वचनेन गुणसामान्यलक्षणस्य पूर्वमुक्तमेवेति यावत् नोक्तदोषः न च विभागश
ब्दानां पूर्वं सत्त्वेन सामान्यार्थप्रतिपादकशब्दस्य पश्चात्त्वादुक्तदोषस्तदवस्थ एवेति वाच्यं अर्थक्रमेण पाठ
क्रमस्यागप्रकारस्य पूर्वमुक्तत्वात् ॥ ॥

२

कर्माणि विभजते उत्क्षेपणेति अत्र कर्मत्वजातिमदर्थककर्मपदेन कर्मविशेषसामान्यकथनमुक्तमस्य
उक्तयुक्तयुक्त्या निरासप्रायात् नोक्तदोषः तत्र उत्क्षेपणत्वादीनि सर्वाणि जातयः ननु भ्रमणादीनि कर्माण्य
पि कानि सन्ति तानि कुतो नोक्तानि इति चेत् तेषां गमनेऽन्तर्भावात् नोक्तानि इति यावत् ननेवमूर्ध्वंगच्छत्यधो

उत्क्षेपणावक्षेपणाकुंचनप्रसारणगमनानि पं
च कर्माणि परमपरं चेति द्विविधं सामान्यम् ॥

गच्छतीत्यादिप्रतीतिबलादुत्क्षेपणादीनामपि गमनेंतर्भावसंभवादेकमेव स्यादिति चेन्न स्वतंत्रेच्छस्य मुनेर्नि
योगपर्यनुयोगानर्हत्वात् कर्म विभज्य सामान्यं विभजते परमिति तत्र तल्लक्षणं तद्द्वैविध्यं समुत्पादनं चा
ग्रे वक्ष्यते ॥ ॥ ॥

त॰टी॰
१

विशेषं विभजते नित्येति नित्यद्रव्यवृत्तयः इत्याश्रयकथनं अनंता इति विभागकथनं लक्षणं चाग्रे वक्ष्यते
समवायस्य भेदो नास्तीत्याह समवायस्त्विति लक्षणं चाग्रे वक्ष्यते अभावं विभजते अभावश्चेति चातुर्विध्यमु
त्पादयति प्रागभावेति उत्पत्तेः पूर्वमभावः प्रागभावः उत्पत्तेरनंतरमभावः प्रध्वंसाभावः नित्योऽभावोऽ

नित्यद्रव्यवृत्तयो विशेषास्त्वनंता एव समवायस्त्वे
कएव अभावश्चतुर्विधः प्रागभावः प्रध्वंसाभावोऽ
त्यंताभावोऽन्योन्याभावश्चेति ॥ ॥ ॥

त्यंताभावः अन्योन्यमभावोऽन्योन्याभाव इत्यर्थः तल्लक्षणं भावभिन्नमिति दिक् ननु प्रागभावादेः किं मा
नमिति चेत् भविष्यतीति ध्वस्तो नष्ट इति नास्ति नास्ति इति इदं वस्त्र इदं नेति यथाक्रमम् ऊहनीयमिति ॥ १
॥ ॥ ॥ ॥

उद्देशक्रमानुरोधेन पृथिवीं लक्षयति गन्धवतीति अत्र पृथिवीलक्षणं गंधवतीति लक्षणं सामान्यसंबंधेन गं
धवतीत्युच्यमाने कालिकसंबंधेन कार्यमात्रे दैशिकसंबंधेन मूर्तमात्रेऽतिव्याप्तिः सुरभिजलं सुरभिर्वायुरिति
प्रतीतिबलाज्जलादावतिव्याप्तिरिति चेन्न समवायेन गंधवती लक्षणकरणान्न जलादावतिव्याप्तिरिति दिक् पृथि

गंधवती पृथिवी सा द्विविधा नित्याऽनित्या च नित्या
परमाणुरूपा अनित्या कार्यरूपा ॥ ॥

वीं विभजते सेति द्वैविध्यमुपपादयति नित्येति अणुरूपा नित्या चेति द्व्यणुकेऽतिव्याप्तिनिरासार्थं परमेति
तत्र नित्यत्वं नाम प्रागभावाप्रतियोगित्वे सति ध्वंसाप्रतियोगित्वं ध्वंसेऽतिव्याप्तिवारणाय विशेषणदलं प्रागभा
वेऽतिव्याप्तिवारणाय विशेष्यदलं अनित्यत्वं नाम प्रागभावप्रतियोगित्वं ध्वंसप्रतियोगित्वं वा ॥ ॥

त॰टी॰
४

प्रकारांतरेण पृथिवीविभजते पुनरिति त्रयोविषयः प्रकाराः यस्याः सा तथा त्रैविध्ये हेतुमाह शरीरेति शरी
रेचेंद्रियंच विषयश्च तेतेषां भेदस्तस्मादित्यर्थः द्वंद्वांते श्रूयमाणं पदं प्रत्येकमभिसंबध्यते इति नियमात् शरीरभे

पुनस्त्रिविधा शरीरेंद्रियविष
यभेदात् शरीरमस्मदादीनाम्

४

दादिंद्रियभेदात् विषयभेदादित्यर्थः त्रैविध्यं मुत्पादयति शरीरमिति अस्मदादीनां यच्छरीरं तत्पार्थिवं शरीरं
पृथिवीसमवायिकारणकमित्यर्थः ॥ राम ॥ ॥ ॥

पार्थिवेंद्रियं दर्शयति इंद्रियमिति पार्थिवेंद्रियं घ्राणं नामकं किं तत्प्रयोजनं गंधग्राहकमिति गंधज्ञानजन
कमित्यर्थः तदाश्रयमाह नासाग्रवर्तीति गंधज्ञानजनकत्वे सति इंद्रियं घ्राणमिति लक्षणमपि सूचितम् इंद्रि
यं घ्राणमित्युक्ते चक्षुरादावतिप्रसंगस्तन्निरासार्थं गंधेत्यादि तावन्मात्रोक्ते गंधघ्राणेंद्रियसंबंधे व्याप्तिस्तन्निरासा
र्थमिंद्रियमिति पार्थिवविषयं निरूपयति विषयइति अत्र तद्गुणसंविज्ञानवहुव्रीहिर्विधेयः आदिनाश्लक्ष्णचूर्णा

मू. इंद्रियं गंधग्राहं घ्राणं नासाग्रवर्ति विषयो मृत्पाषाणादिः
शीतस्पर्शवत्य आपः ॥ ॥ ॥

दिपरिग्रहः जलं निरूपयति शीतेति आपइति लक्ष्यनिर्देशः शीतस्पर्शवत्यइति लक्षणनिर्देशः शीतश्चासौ
स्पर्शश्चेति शीतस्पर्शः सोस्ति आसां आस्वेवा शीतस्पर्शवत्यः स्पर्शवत्वं पृथिव्यादावतिप्रसक्तं तन्निरासार्थं
शीतेति आकाशादावारणाय स्पर्शइति तत्र समवायेन बोध्यं तेन कालिकादिसंबंधेन कार्यमात्रे मूर्तमात्रे च ना
तिव्याप्तिः शीतो वायुः शीतं शिलातलं इति प्रतीतिः स्वसमवायिसंयोगेन बोध्या ॥ ॥ ॥

जलं विभजते ताश्चेति नित्यत्वाऽनित्यत्वे पूर्ववद्द्वैविध्यं प्रकारांतरेण जलं विभजते पुनरिति त्रैविध्ये हेतुमाह ।
शरीरेति जलीयं शरीरं दर्शयति शरीरमिति जलीयशरीरं वरुणलोके प्रसिद्धं तत्र च किं मानमिति चेत् प्र
गुणैर्वारुणी वरुणात्पितरस्तूपसमारेत्यादिश्रुतिर्मानमिति जलीयमिंद्रियं निरूपयति इंद्रियमिति जलीय।

ताश्च द्विविधा नित्याः अनित्याश्च नित्या परमाणुरूपा अनित्या
कार्यरूपाः पुनस्त्रिविधाः शरीरेंद्रियविषयभेदात् शरीरं
वरुणलोके इंद्रियं रसग्राहकं रसनं जिह्वाग्रवर्ति विषयः स
रित्समुद्रादिः ॥

मिंद्रियं रसनसंज्ञकं तस्य किं प्रयोजनं रसज्ञानजनकं तदाश्रयमाह जिह्वाग्रवर्तीति रसज्ञानसाधनत्वे सतिं
द्रियत्वं रसनत्वं इंद्रियत्वमित्युच्यमाने चक्षुरादावतिव्याप्तिस्तन्निरासार्थं रसेत्यादि रसज्ञानसाधनत्वमात्रोक्तौ
रसे रसनेंद्रियसंयोगेतिव्याप्तिस्तद्वारणायेंद्रियमिति ॥ ॥ राम ॥

तेजो निरूपयति उष्णेति उष्णश्चासौ स्पर्शश्च उष्णस्पर्शः उष्णस्पर्शोऽस्यास्तीति उष्णस्पर्शवत्तेजः इति लक्षणनिर्दे
शः उष्णस्पर्शवदितितल्लक्षणं उष्णस्पर्शवत्त्वं तेजसो लक्षणं तच्च समवायेन बोध्यं स्पर्शवदित्युच्यमाने पृ
थिव्यादावतिव्याप्तिस्तद्वारणाय उष्णेति तावन्मात्रोच्यमाने कालिकादिसंबंधेन कार्यमात्रे मूर्तमात्रे चातिव्या।

उष्णस्पर्शवत्तेजः तच्च द्विविधं नित्यमनित्यं च नित्यं परमाणु
रूपं अनित्यं कार्यरूपं पुनस्त्रिविधं शरीरेन्द्रियविषयभेदा
त् शरीरमादित्यलोके ॥

प्तिस्तद्वारणाय समवायेनेति उष्णं जलं उष्णो वायुर्वातीति प्रतीतिः स्वसमवायिसंयोगेनेति न तत्रातिव्या
प्तिः तेजो विभजते तच्चेति नित्यत्वानित्यत्वे पूर्ववद्बोध्ये प्रकारान्तरेण तेजो विभजते शरीरेति त्रैविध्यमुपपा
दयति शरीरमिति तैजसं शरीरमादित्यलोके प्रसिद्धं सूर्यादीनामिति यावत् ॥ ॥ ॥

त॰टी॰
६

तैजसमिंद्रियं दर्शयति इंद्रियमिति तैजसमिंद्रियं चक्षुर्नामकं तस्य किं तस्य किं प्रयोजनं रूपज्ञानसाधनं रू
पज्ञानसाधनत्वे सति इंद्रियत्वं चक्षुषो लक्षणं । इंद्रियत्वमित्युक्तौ घ्राणादावतिव्याप्तिस्तन्निरासार्थं रूपज्ञानेत्या
दि रूपज्ञानसाधनत्वमात्रोक्तौ रूपचक्षुःसन्निकर्षेऽतिव्याप्तिस्तन्निरासार्थमिंद्रियमिति तदाश्रयमाह कृ

इंद्रियं रूपग्राहकं चक्षुः कृष्णताराग्रवर्ति विषय
स्त्रिविधः भौमदिव्यौदर्याकरजभेदात् ॥

ष्णतारेति तैजसं विषयं निरूपयन् तं विषयं विभजते विषयेति चात्रविध्यं व्युत्पादयति भौमेति भौमं च ।
दिव्यं च औदर्यं च आकरजं च एतानि तत एव
तस्मादित्यर्थः ॥ ॥

६

तत्रभौममुदाहरति भौममिति भूमौभवंभौमं आदिनाखद्योततेजः प्रभृतेः परिग्रहः दिव्यमुदाहरति अ
विति आपः इंधनंयस्यतत्तथादिविभवंदिव्यमित्यर्थः विद्युदादीत्यादिनासूर्यादितेजः प्रभृतेः परिग्रहः
औदर्यमुदाहरति भक्तेति भक्तस्येति पीतस्योपलक्षणंभक्तस्यान्नादेःपीतस्यजलादेःपरिणामस्तोः

भौमंवज्राद्रिकंदिव्यमविंधनंविद्युदादिभक्त
स्यपरिणामहेतूरौदर्यमाकरजंसुवर्णादि ॥

सा

स्यहेतूरौदर्यंउदरेभवमौदर्यहेतूरौदर्यमित्यन्वयमानेभिनतिहेतुःकारुस्तत्रातिव्याप्तिस्तद्वारणायपरि
णामेति परिणामहेतूरित्यन्वयमानेसूर्यादावतिव्याप्तिस्तन्निरोर्थंभक्तस्येति आकरजंदर्शयति आक
रजमिति आकराज्जायतइत्याकरजंसुवर्णमादियस्यतत्सुवर्णादिअत्रादिनारजतादेःपरिग्रहः ॥

तं॰ दी॰
७

उद्देशक्रमानुरोधेन तेजो निरूप्य वायुं निरूपयति रूपरहित इति रूपेण रहितो रूपरहितः स्पर्शोऽस्यास्तीति
स्पर्शवान् रूपरहितश्चासौ स्पर्शवांश्च रूपरहितस्पर्शवान् विशेषणेन लक्षणनिर्देशः विशेष्येण लक्ष्य
निर्देशः वत्विति वक्तुं न शक्यते न च केवलाप्रक्तिनिप्रत्ययः श्रयोक्तव्य इति नियमात् स्पर्शवान् इत्युक्ते

रूपरहितस्पर्शवान् वायुः स द्विविधः नित्योऽनित्यश्च
नित्यः परमाणुरूपः अनित्यः कार्यरूपः पुनस्त्रिविधः

पृथिव्यादावतिव्याप्तिस्तन्निरासार्थं रूपरहित इति तन्मात्रोक्तौ कालादावतिव्याप्तिस्तद्वारणाय स्पर्शवान्
इति स च समवायेन बोध्यः नातो गुणादावतिव्याप्तिः वायुं विभजते स इति द्वैविध्यं स्फुटयति नित्य इति
नित्यत्वाऽनित्यत्वे च पूर्ववद्बोध्ये प्रकारान्तरेण विभजते पुनरिति ॥ ॥ ॥

अवयवजन्यत्वे सति अवयवी अजहत्कत्वं अन्त्यावयवत्वं २

द्वैविध्ये हेतुमाह शरीरेति वायवीयं शरीरं दर्शयति शरीरमिति वायुसमवायिकारणकं शरीरं वायुलोके प्र
सिद्धं तच्च पिशाचादीनामिति यावत् शरीरत्वं च अन्त्यावयवित्वे सति चेष्टाश्रयत्वं चेष्टा च हिताहितप्राप्तिपरि
हारार्था क्रिया वायवीयमिन्द्रियं दर्शयति इन्द्रियमिति वायवीयमिन्द्रियं त्वक् उक्तं तस्य किं प्रयोजनं स्पर्शज्ञा
नसाधनं स्पर्शज्ञानसाधनत्वे सति इन्द्रियत्वं त्वक् इन्द्रियत्वमित्युक्ते चक्षुरादावतिव्याप्तिस्तद्वारणाय विशेषणं।

उपभोगसाधनत्वं विषयस्य लक्षणं

शरीरेन्द्रियविषयभेदात् शरीरं वायुलोके
इन्द्रियं स्पर्शग्राहकं त्वक् सर्वशरीरवर्ति ॥

आत्मन्यतिव्याप्तिवारणाय सत्यन्तं
कालादावतिव्याप्तिवारणाय विशे
ष्यं श्रोत्रेऽव्याप्तिवारणाय शब्देन
इति चक्षुरादेऽतिव्याप्तिवारणाय
उद्भूतेति ॥२॥

दलं तस्मात् श्रोत्रे कोऽस्पर्शत्वगिन्द्रियसंबन्धेऽतिप्रसंगस्तन्निरासार्थमिन्द्रियमिति इन्द्रियत्वं च शब्देतरोद्भूतविशेषगु
णानाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वं शब्दान् इतरे ये उद्भूतविशेषगुणा घटादिवृत्ति रूपादयस्तद
नाश्रयत्वे सति ज्ञानकारणं यन्मनःसंयोगस्तदाश्रयत्वं च चक्षुरादावस्तीति लक्षणसमन्वयः तदाश्रयमाह
सर्वेति ॥

अचेतनस्य स
चेतनाधिष्ठाने
नौ वक्रार्यादप
दकं त्व कुठारादी वत्

आत्मा मनसा संयुज्यते मनः इन्द्रियेण इन्द्रियमर्थेन
ततः प्रत्यक्षम् ॥२॥

रूपं गंधो रसः स्पर्शः स्नेहः सांसिद्धिको द्रवत्वं बुद्ध्यादो
भावना तथा शब्दो वैशेषिका गुणाः ॥२॥

त॰दी॰
८

वायवीयं विषयं दर्शयति विषय इति वृक्षादेरित्यस्य तथा तस्य कंपनेन तस्य हेतुरित्यर्थः अत्रादिना शरीरादिप-
रिग्रहः विषयांतमुक्त्वा प्राणवायुं निरूपयति शरीरेति वायुः प्राण एतावन्मात्रोक्ते वा बाह्यवायावतिव्याप्तिस्त-
न्निरासार्थं संचारीति तदापि तत्रातिव्याप्तिस्तद्वारणार्थं मंतरमिति तथापि तत्रातिप्रसंगस्तन्निरासार्थं शरीरे

विषयो वृक्षादिकंपनहेतुः शरीरांतः संचारिवायुः प्रा-
णः स चैकोप्युपाधिभेदात् प्राणापानादिसंज्ञां लभते

ति शरीरांतो वायुः प्राण इत्युच्यमाने पवनंजयेऽतिव्याप्तिस्तद्वारणाय संचारीति शरीरांतः संचारी प्राण इत्यु-
च्यमाने मनस्यतिव्याप्तिस्तन्निरासार्थं वायुरिति नन्वपानादिवायूनामधिकानां सत्वात्तदकथनान्न्यूनता-
पत्तिरित्यत आह सचेति प्राणश्चैक एव तिरोमाद्युपाधिवशात्प्राणापानादिशब्दैर्व्यवह्रियत इत्यर्थः ॥

मुखनासिकाभ्यां निर्गमनप्रवेशनात् प्राणः अधोनयनात् अपानः
जठरानलस्य समुन्नयनात् समानः ऊर्ध्वमुन्नयनात् उदानः वितननात् व्यानः

८

आकाशं निरूपयति शब्दगुणमिति शब्दो गुणो यस्य तत्तथा शब्दगुणमिति लक्षणनिर्देशः आकाशमिति लक्ष्यनिर्देशः गुणवदाकाशमित्युक्ते जलादावतिप्रसंगस्तन्निरासार्थं शब्देति तच्च समवायेन बोध्यं तेन का-लिकादिसंबंधेन घटादौ नातिव्याप्तिः ननु शब्दवदित्येव वाच्यं गुणपदस्य वैयर्थ्यत्वादिति चेन्न मीमांसकमते शब्दस्य द्रव्यत्वेन तन्निरासार्थत्वात् भेदे मानाभावात् आह तच्चेति विभुत्वात् नित्यत्वं च तत्र च प्रयोगः आकाशं नित्यं विभुत्वात् ईश्वरवत् कालं निरूपयति अतीतेति हेतुः कालपदावक्ष्यमाने ईश्वरादावतिव्याप्तिवारणाय।

शब्दगुणमाकाशं तच्चैकं विभु नित्यं च अतीतादिव्यवहारहेतुः कालः स चैको विभुर्नित्यश्च ॥

व्यवहारेति व्यवहारहेतुः काल इत्युच्यमाने पुनरीश्वरादौ घटादावतिव्याप्तिः दण्डो दण्डीत्यादिव्यवहारहेतुत्वात् तद्वारणाय अतीतेति तावदुच्यमानेप्याकाशे अतिव्याप्तिः व्यवहारस्य शब्दात्मकत्वेन शब्दं प्रत्याकाशस्य समवायिकारणत्वात् असाधारणपदे दत्तेपि तथैव गतो साधारणनिमित्तहेतुरिति तावदुच्यमानेपि दण्डत्वादावतिव्याप्तिः तत्प्रसंगस्तन्निरासार्थं द्रव्यत्वे सति विशेषणमतो नातिव्याप्तिः भेदे मानाभावादाह स चेत्यादि विभुत्वात् नित्यश्च कालो नित्यो विभुत्वात् आकाशवत् ॥

अभिघातजनोदनं च शब्दहेतुरित्यादिमः शब्दा हेतुर्द्वितियास्यात्

त॰ दी॰
१

निशं निरूपयति प्राच्यादीति प्राचीआदिर्यस्य स तथा स चासौ व्यवहारश्चेति तस्य हेतुः प्राच्यादिव्यवहारहेतुर्दिक्
हेतुर्दिक् इत्युच्यमाने कालादावतिव्याप्तिरतो व्यवहारेति तावदुच्यमानेऽपि तत्र घटादौ चातिव्याप्तिः घटो घट इत्या
दिव्यवहारहेतुत्वात् घटादीनामतः प्राच्यादीति तावदुच्यमानेऽपि व्योमन्यतिप्रसंगः शब्दरूपव्यवहारस्यापि सम
वायिकारणत्वाद्व्योम्नः अस्माधारणपदे दत्तेऽपि तथैव तद्वारणाय साधारणनिमित्तेनेति तावदुच्यमानेऽपि कठ

प्राच्यादिव्यवहारहेतुर्दिक् सा चैका नित्या विभ्वी च. ज्ञानाधिकरणमात्मा स
द्विविधः परमात्मा जीवश्चेति ॥

ज्ञानत्वाद्यभिव्याप्तेः तित्प्रसंगस्तन्निरासार्थं द्रव्यत्वे सतीति विशेषणमिति नहुज्ञाप्यतिव्याप्तिः भेदे मानाभावा
दाह साचेत्यादि विभ्वीत्वात् नित्येति पूर्ववत् आत्मनो लक्षणमाह ज्ञानेति अधिकरणमित्युच्यमाने घट
कालादावतिव्याप्तिस्तद्वारणाय ज्ञानादीति तावदुच्यमानेऽपि घटादावतिव्याप्तिर्विषयतासंबंधेन घटादीनां
ज्ञानाधिकरणत्वात् तन्निरासार्थं समवायेनेति ज्ञानादिरित्यादिना सुखादिपरिग्रहः ॥

४

तद्वेति परमात्मजीवयोरित्यर्थः ईश्वरत्वजातिसमवायेन नित्यज्ञानाधिकरणत्वमिति पदकृत्यं तत्र शर्ववत्
जीवत्वजातिजन्यज्ञानाधिकरणत्वम् जीवो नित्यो विभुत्वात् आकाशवत् मनो निरूपयति सुखादीति
सुखं आदिर्यस्य तत्तथा तस्य उपलब्धिस्तस्याः साधनं सुखाद्युपलब्धिसाधनं इंद्रियं मन इत्युच्यमाने चक्षुरा।

तत्र परमेश्वरः सर्वज्ञः स एक एव जीवः प्रतिशरीरं भिन्नो
विभुर्नित्यश्च सुखाद्युपलब्धिसाधनमिंद्रियं मनः त(
च्च प्रत्यात्मनियतत्वादनंतं परमाणुरूपं नित्यं च ॥

दावतिव्याप्तिस्तद्वारणाय सुखाद्युपलब्धिसाधनं मन इत्युच्यमाने सुखादि मनःसन्निकर्षे अतिप्रसंगात्तन्नि
रासार्थमि[illegible] ।द्रियमित्यपि देयम् ॥

त॰टी॰
१०

उद्देशक्रमानुरोधेन रूपं लक्षयति चक्षुर्मात्रेति गुणोगुरूपमित्युच्यमाने रसादावतिव्याप्तिस्तद्वारणाय विशेषे
ति विशेषगुणो रूपमित्युच्यमानेपि रसादावतिव्याप्तिस्तन्निरासार्थं ग्राह्येति तावदुच्यमानेपि नेत्रेवातिव्या
प्तिस्तद्वारणाय चक्षुर्मात्रेति चक्षुरितराग्राह्यत्वे सति चक्षुर्ग्राह्यत्वं चक्षुर्मात्रग्राह्यत्वं सांसिद्धिकद्रवत्वस्य च।
त्वगितरत्वगिंद्रियग्राह्यत्वान्नतत्रातिव्याप्तिरिति भावः चक्षुर्मात्रग्राह्यत्वमेतावन्मात्रमुच्यमाने रूपत्वरूपाभावयो

अथ गुणः चक्षुर्मात्रग्राह्यो विशेषगुणो रूपम् ॥ ॥

रतिव्याप्तिस्तयोरपि चक्षुर्मात्रग्राह्यत्वात् येनेंद्रियेण यद्गृह्यते तेनेंद्रियेण तन्निष्ठा जातिस्तदभावश्चापि गृ
ह्यत इति नियमात्तद्वारणाय गुण इति तावन्मात्रमुच्यमानेऽपि प्रभाभित्तिसंयोगेऽतिव्याप्तिरतो विशेषेति तावन्मा
त्रमुच्यमानेपि परमाणुरूपादावव्याप्तिस्तद्वारणाय ग्राह्यजातेयतिना व्याप्तिः जातिघटितलक्षणे विशेषपद
स्यानाकांक्षितत्वान्नोपादेयमेवैतेन चक्षुरितराग्राह्यत्वे सति चक्षुर्ग्राह्यजातीयगुणो रूपमिति पर्यवस
न्नम् ॥

१०

रूपं विभजते तच्चेति सप्तविधत्वे हेतुमाह शुक्लेति शुक्लस्य नीलस्य पीतस्य रक्तस्य हरितस्य कपिशस्य चि-
त्रस्य चतानि तेषां भेदस्तस्मादित्यर्थः तदाश्रयमाह पृथिवीति पृथिवी च जलं च तेजश्च तानि तेषु वृत्तिर्यस्य तत्
पृथिवीजलतेजोवृत्ति पृथिवीजलतेजस्समवेतमित्यर्थः आश्रयं विभज्य दर्शयति तत्रेति तेषु मध्य इत्यर्थः
समवायेन नानारूपवत्त्वमित्यपि पृथिवीलक्षणं सूचितं परप्रकाशकं भास्वरं तद्भिन्नमभास्वरं अभास्वरं

तच्च शुक्लनीलपीतरक्तहरितकपिशचित्रभेदात् सप्तविधं पृथिवीजलतेजो
वृत्ति तत्र पृथिव्यां सप्तविधम् अभास्वरं शुक्लं जले शुक्लं भास्वरं तेजसि रसनाग्राह्यो
गुणो रसः ॥

चतत्र शुक्लं चाभास्वरशुक्लं तच्च जलवृत्ति जलसमवेतमिति यावत् समवायेन।
भास्वरशुक्लरूपवज्जलमिति लक्षणमपि सूचितं भास्वरं शुक्लं तेजोवृत्ति तेजस्समवेतमिति यावत् समवायेन
भास्वरशुक्लरूपवदपि तेजोलक्षणं रसं निरूपयति रसनेति गुणो रसः रस्यमाने रूपादावतिव्याप्तिस्तद्वारणा-
य ग्राह्य इति तद्रूपेऽपि तत्रैवातिव्याप्तिः स्यात् तद्वारणाय रसनेति रसनाग्राह्यः रस्यमाने रसनादावतिव्याप्तिस्त-
द्वारणाय गुण इति ॥

त॰ दी॰
११

रसं विभजते स चेति षड्विधत्वे हेतुमाह मधुरेति समासादिः पूर्ववद्बोध्यः रसस्याश्रयमाह पृथिवीति
आश्रयं विभज्य दर्शयति तत्रेति षड्विधो रसः पृथिवीसमवेतरसार्थः जलसमवेतो मधुर एवेत्यर्थः गंधं नि
रूपयति घ्राणेति ग्राह्यो गुणो गंध इत्युच्यमाने रूपादावतिव्याप्तिस्तद्वारणाय घ्राणेति तावन्मात्रोच्यमाने गंधत्वादा

स च मधुराम्ललवणकटुकषायतिक्तभेदात्षड्विधः
पृथिवीजलवृत्तिः तत्र पृथिव्यां षड्विधः जले मधुर ए
व घ्राणग्राह्यो गुणो गंधः स च द्विविधः सुरभिरसुरभिश्च
पृथिवीमात्रवृत्तिः ॥

वतिव्याप्तिस्तद्वारणाय गुणेति गंधं विभजते स चेति द्वैविध्यं समुपादयति सुरभिरिति तदाश्रयमाह पृथि
वीति पृथिवीतरावृत्तित्वे सति पृथिवीवृत्तिः पृथिवीमात्रसमवेतत्वमर्थः ॥ ॥ ॥

११

म३

स्पर्शं निरूपयति त्वगिंद्रियेति स्पर्श इति लक्ष्यनिर्देशः त्वगिंद्रियेत्यादि लक्षणनिर्देशः त्वगिंद्रियेतराग्राह्यत्वे सति त्वगिंद्रियग्राह्य इति ग्राह्यो गुण इत्युच्यमाने रूपादावतिव्याप्तिस्तद्वारणाय त्वगिंद्रियग्राह्य इति तावदुच्यमाने संख्यादावतिव्याप्तिस्तद्वारणाय सत्यंतं त्वगिंद्रियग्राह्यपदं तावदुच्यमाने स्पर्शत्वादावतिव्याप्तिस्तद्वारणाय।

त्वगिंद्रियमात्रग्राह्यो गुणः स्पर्शः स च
त्रिविधः शीतोष्णानुष्णाशीतभेदात् ॥

गुणपदमिति तावदुच्यमाने पिपरमाणुस्पर्शेऽव्याप्तिस्तद्वारणाय ग्राह्यजातीयेति न तत्राव्याप्तिरिति त्वगिंद्रियेतराग्राह्यत्वे सति त्वगिंद्रियग्राह्यजातीयगुणः स्पर्श इति लक्षणपर्यवसन्नम् स्पर्शं विभजते स चेति स्पर्शस्त्रयो विधयः प्रकारा यस्य स इत्यर्थः त्रैविध्ये हेतुमाह शीतेति समासश्च पूर्ववद्बोध्यः इति ॥

तदाश्रयमाह पृथिवीति पृथिवी च जलं च तेजश्च वायुश्च ते पृथिवीजलतेजोवायवः तेषु वृत्तिर्यस्य स तथेत्यर्थः
आश्रयं विभज्य प्रदर्शयति तत्रेति तेषु मध्ये शीतस्पर्शो जले जलसमवेत इत्यर्थः उष्णस्पर्शस्तेजस्समवेत इत्यर्थः
अनुष्णाशीतस्पर्शः पृथिवीवायुसमवेत इत्यर्थः यद्यपि स्पर्शनिरूपणानन्तरं संख्यानिरूपणावसरस्तथापि रूपा

पृथिव्यप्तेजोवायुवृत्तिः तत्र शीतो जले उष्णस्तेजसि अनुष्णाशीतः
पृथिवीवाय्वोः रूपादिचतुष्टयं पृथिव्यां पाकजमनित्यं च ॥

दिचतुष्टयवयतः पाकजत्वादिसंभवश्च अत एतेषु गुणेषु पाकजत्वापाकजत्वे निरूपयति रूपादीति रूपमादिर्यस्य
तद्रूपादि रूपादि चतुष्टयं च रूपादिचतुष्टयं पृथिव्यामेव पाकजं पाकजस्तेजस्संयोगस्तस्माज्जायत इति
तेजस्संयोगासमवायिकारणकमित्यर्थः ॥ ॥

अन्यत्रेति जलादावित्यर्थः अपाकजं तेजस्संयोगाः नसमवायिकारणकमित्यर्थः तच्च नित्यमनित्यं च
जलपरमाण्वादिगतं नित्यं जलद्व्यणुकादिगतमनित्यमित्यर्थः संख्यां निरूपयति एकादीति एकत्वादि
त्यस्यस एकादिः एकादिश्चासौ व्यवहारश्च एकादिव्यवहारस्तस्य हेतुः संख्येत्यर्थः हेतुः संख्येत्युक्तौ का

अन्यत्रापाकजं नित्यमनित्यं च नित्यगते नित्यंगतं
अनित्यं एकादिव्यवहारहेतुः संख्या ॥

लादावतिव्याप्तिस्तद्वारणाय व्यवहारेति व्यवहारः शाब्दस्तस्य कारणमाकाशं तत्रातिप्रसंगस्तद्वारणाय ए
कादीति हेतुः पदं चासाधारणकारणपरं तेन न चेश्वरादावतिप्रसंगस्तथापि कंठताल्वाद्यभिघातेः तिव्या
प्तिस्तद्वारणाय तज्जित्वे सतीत्यपि देयम् ॥ ॥ ॥ राम

तदाश्रयमाह नवेति नवचतानिद्रव्याणितेषुसमवेतेत्यर्थः ननुसंख्यायाअवधिरस्तिनवेत्याकांक्षायामा
ह एकत्वादीति एकत्वमादिर्यस्याः सापरार्द्धपर्य्यन्तायस्याः सा एकत्वादिश्चासौपरार्द्धपर्य्यन्ता एकत्वादिप
रार्द्धपर्य्यन्तेत्यर्थः एकंदशशतंचैवसहस्रमयुतंतथा लक्षंचनियुतंचैवकोटिरर्बुदमेवच वृंदंखर्वौनिख

नवद्रव्यवृत्तिः एकत्वादिपरार्द्धपर्य्यन्ता एकत्वंनित्यमनि
त्यंचनित्यगतंनित्यमनित्यगतमनित्यंद्वित्वादिकंतुसर्वत्रा
नित्यमेव ॥

र्वश्चशंखपद्मश्चसागरः अन्त्यंमध्यंपरार्द्धंचदशवृद्ध्यायथाक्रमंइतिविभजते एकत्वमितितद्युत्पादयतिनि
त्येति नित्यद्रव्यसमवेतंनित्यमित्यर्थः अनित्यद्रव्यसमवेतमनित्यमित्यर्थः द्वित्वमादिर्यस्यतत्तथानित्यद्र
व्यसमवेतमनित्यमित्यर्थः अयमेकत्वाद्यपेक्षाबुद्धिजन्यत्वादितिभावः ॥ ॥

परिमाणं निरूपयति मानेति मानं चायं व्यवहारे मानव्यवहार इदमेतन्मानमित्याकारकस्तस्यासाधारणं परि-
माणमित्यर्थः कारणं परिमाणमित्युक्ते कालादावतिव्याप्तिस्तद्धारणायासाधारणेति तावन्मात्रोक्तौ दण्डादाव-
तिप्रसंगस्तद्धारणाय व्यवहारेति तावन्मात्रोक्तावाकाशादावतिप्रसंगस्तद्धारणाय मानेति तदाश्रयमाह नवेति

मानव्यवहारासाधारणं कारणं परिमाणं नवद्रव्य-
वृत्ति तच्चतुर्विधमणुमहद्दीर्घं ह्रस्वं चेति ॥

नवद्रव्याणि तेषु वृत्तिर्यस्य तत्तथेत्यर्थः परिमाणं विभजते तदिति परिमाणमित्यर्थः चत्वारो विधयः
प्रकारा यस्य तत्तथेत्यर्थः चातुर्विध्यमुत्पादयति अणुत्वादिना अणुत्वादिपदं भावप्रधानार्थकं यथाश्रु-
तार्थस्वीकारे परिमाणविभागप्रकरणे द्रव्यविभागापत्तेः तथा च अणुत्वं महत्त्वं दीर्घत्वं ह्रस्वत्वं चेत्यर्थः ॥

पृथक्त्वं निरूपयति पृथगिति इदमस्मात्पृथगिति यो व्यवहारस्तस्यासाधारणं कारणं पृथक्त्वमित्यर्थः यद्यपि
संयुक्तपूर्वं वहाम्यामिति इदं वस्तु इदं वस्तु इदं नेति प्रतीतेः इदमस्मात्पृथगिति प्रतीतेर्वलक्षण्याविषयत्वात् पृथक्त्वाख्य
पदार्थस्यान्योन्याभावेनान्यथाभाव इति दिक् पृथक्त्वाश्रयमाह सर्वेति सर्वाणि च तानि द्रव्याणि सर्वद्रव्याणि तेषु

पृथक्व्यवहारासाधारणं कारणं पृथक्त्वं सर्वद्रव्यवृत्ति
संयुक्तव्यवहारहेतुः संयोगः सर्वद्रव्यवृत्तिः ॥

वृत्तिर्यस्य तत्तथेत्यर्थः संयोगं लक्षयति संयुक्तेति इमौ पदार्थौ संयुक्ताविति यो व्यवहारस्तस्य हेतुः संयोग
इत्यर्थः हेतुपदमसाधारणपरमिति पदकृत्यं पूर्ववहाम्यामिति संयोगाश्रयमाह सर्वेति सर्वाणि च तानि द्रव्या
णि तेषु वृत्तिर्यस्य स तथेत्यर्थः ॥ ॥

न॰टी॰
२४

२४

विभागं निरूपयति संयोगेति संयोगं नाशयतीति संयोगनाशकः संयोगनाशासाधारणकारणं विभाग इत्यर्थः गुणो विभाग इत्युक्ते रूपादावतिव्याप्तिस्तद्वारणाय कारणेति तावत्युक्तेपि ईश्वरेच्छादावतिव्याप्तिस्तद्वारणाय असाधारणेति तावत्युक्तेपि चरमरूपासमवायिकारणे कपालरूपे ऽतिव्याप्तिस्तद्वारणाय नाशेति तावत्युक्तेपि पूर्वरूपादिनाशकारणे तेजस्संयोगे ऽतिव्याप्तिस्तद्वारणाय संयोगेति तथापि संयोगे ऽतिव्याप्तिः संयोगस्यापि संयोगनाशजनकत्वात् तद्वारणाय समवायेनेत्यवधेयं परत्वापरत्वे निरूपयति परेति परश्चापरश्च परापरौ तौ च व्यवहारौ परापरव्यवहारौ तयोरसाधारणकारणे परत्वापरत्वे परव्यवहारासाधारणकारणं परत्वम् अपरव्यवहारासाधारणकारणमपरत्वमित्यर्थः इदमस्मादस्यापेक्षया परं इदमस्मादस्यापेक्षया ऽपरमिति व्यवहाराविति पदकृत्यमपूर्ववद्व्याख्यमिति ते विभजते त इति द्वौ विधौ प्रकारौ ययोस्ते इत्यर्थः द्वैविध्यमुपपादयति दिक्कृत इति दिक्प्रयोज्ये कालकृत इति कालप्रयोज्ये इत्यर्थः तदुदाहरति दूरस्थमिति दिक्कृतं परत्वं समीप

संयोगनाशको गुणो विभागः सर्वद्रव्यवृत्तिः परापरव्यवहारासाधारणकारणे परत्वापरत्वे ते द्विविधे दिक्कृते कालकृते चेति दूरस्थे दिक्कृते परत्वं समीपस्थे दिक्कृते परत्वम् ॥

त॰टी॰
१५

ज्येष्ठे कार्ये कालजन्यं परत्वं कनिष्ठे कार्ये पदार्थे कालजन्यमपरत्वमित्यर्थः कथं परत्वापरत्वयोर्दिक्कृज
न्यत्वकालजन्यत्वे इति चेदुच्यते चित्रकूटस्थानो विपाशापेक्षया ज्वालामुखं परं बहुतरमूर्तसंयुक्तसंयो
गि विपाशाजन्मविप्रकृष्टापेक्षया ज्वालामुखमपरमल्पतरमूर्तसंयुक्तसंयोगी मृत्तमयो रामनोहीरानं
दो ज्येष्ठो बहुतरदिवाकरक्रियावान् हीरानंदस्य मन्तस्तहीरामः कनिष्ठोऽल्पतरदिवाकरक्रियावान् तत्र च

ज्येष्ठे कालकृतं परत्वं कनिष्ठे कालकृतमपरत्वम् ॥

दैशिकपरत्वापरत्वे सासमवायिकारणाभावकार्यत्वात् घटवत् असमवायिकारणं च बहुतराल्पतर
मूर्तसंयुक्तसंयोगः स च बहुतराल्पतरमूर्तातिरिक्तद्रव्याश्रितः असमवायिकारणत्वात् घटभूतलसंयो
गवत् एवं च दिक्कृजन्यत्वसिद्धिः कालिकपरत्वापरत्वे सासमवायिकारणाभावकार्यत्वात् पटवत् असम
वायिकारणं च बहुतराल्पतरदिवाकरक्रियावशिष्टसंयुक्तसंयोगस्स च शरीरातिरिक्तद्रव्याश्रितः संयोगत्वा

१५

गुरुत्वंलक्षयति आद्येति आद्यंचतत्पतनंआद्यपतनंतस्यासमवायिकारणंगुरुत्वमित्यर्थः कारणंगुरुत्वमि
त्युक्तेदंडादावतिव्याप्तिस्तद्वारणायासमवायेतितावदुक्तेकपालद्वयसंयोगादावतिप्रसंगस्तद्वारणायप
तनेति तावदुक्तेवेगेतिव्याप्तिस्तद्वारणायाद्येतितथाचनकुत्रापिदोषः तदाश्रयमाह पृथिवीति २

आद्यपतनासमवायिकारणंगुरुत्वंपृथिवीजलवृत्ति
आद्यस्यंदनासमवायिकारणंद्रवत्वम् ॥ ॥

पृथिवीचजलंचतेतयोर्वृत्ति इत्यर्थः द्रवत्वंलक्षयति आद्येति आद्यंचतत्स्यंदनंआद्यस्यंदनंतस्यासमवायि
कारणंद्रवत्वमित्यर्थः कारणंद्रवत्वमित्युक्तेवेमादावतिव्याप्तिस्तद्वारणायासमवायीतितावदुक्तेहस्तवाद्य
संयोगादावतिप्रसंगस्तद्वारणायस्यंदनेतितावदुक्तेवेगेतिप्रसंगस्तद्वारणायाद्येतितथाचनकुत्रापिदोषः

त॰टी॰
१९

द्रवत्वाश्रयमाह पृथिवीति पृथिवी च आपश्च तेजश्च तानि तेषु वृत्तिर्यस्य तत्तथेत्यर्थः द्रवत्वं विभजते तदि
ति द्रवत्वं द्विविधं द्वौ विधौ प्रकारौ यस्य तत्तथेत्यर्थः द्वैविध्यमुपपादयति सांसिद्धिकमिति सांसिद्धमेव सां

पृथिव्यप्तेजोवृत्ति तद्द्विविधं सांसिद्धिकं नैमित्तिकं च
सांसिद्धिकं जले नैमित्तिकं च पृथिवीतेजसोः ॥

सिद्धिकं निमित्तमस्यास्तीति नैमित्तिकं निमित्तजन्यमित्यर्थः आश्रयं विभज्य दर्शयति सांसिद्धिकमिति
जलसमवेतमित्यर्थः नैमित्तिकं द्वितीयं पृथिवीतेजोवृत्तिरित्यर्थः ॥ ॥ ॥

१९

पृथिव्यां कथं द्रवत्वमित्याकांक्षायामभिनयति पृथिव्यामिति घृतादिरूपायां पृथिव्यामग्निसंयोगजन्यं द्र
वत्वमित्यर्थः सुवर्णादिरूपे तेजसि च द्रवत्वमसिद्धमित्यर्थः स्नेहं निरूपयति चूर्णादीति चूर्णमादिर्यस्य स
चूर्णादिस्तस्य पिंडीभावः संयोगविशेषस्तस्य हेतुर्गुणः स्नेह इत्यर्थः हेतुपदमसाधारणकारणपरं गुणः

पृथिव्यां घृतादावग्निसंयोगजं द्रवत्वं तेजसि सुवर्णा
दौ चूर्णादिपिंडीभावहेतुर्गुणः स्नेहः जलमात्रवृत्तिः

स्नेहस्योक्तौ रूपादावतिव्याप्तिस्तद्वारणाय कारणमिति तदापि ईश्वरेच्छादावतिप्रसंगस्तद्वारणाय असा
धारणेति तथापि च रूपसाधारणकारणे कपालरूपेऽतिव्याप्तिस्तद्वारणाय पिंडीभावेति गुणपदादा
ने चूर्णादावतिव्याप्तिस्तद्वारणाय गुणपदं देयं स्नेहाश्रयमाह जलेति जलेतरावृत्तिर्वसति जलवृत्तिरित्यर्थः

शब्दं निरूपयति श्रोत्रेति श्रोत्रेणग्राह्यः श्रोत्रग्राह्योगुणः शब्दइत्यर्थः गुणः शब्दइत्युक्तेरूपादावति
व्याप्तिस्तद्वारणायग्राह्येति तावदुक्तेपितत्रैवातिप्रसंगस्तद्वारणायश्रोत्रेतिगुणपदादानेशब्दत्वादावति
व्याप्तिस्तद्वारणायगुणपदमितिनिर्दोषः शब्दाश्रयमाह आकाशेति आकाशेतरासमवेतत्वेसतिआ।

श्रोत्रग्राह्योगुणः शब्दः आकाशमात्रवृत्तिः सद्विविधः ध्वन्यात्मकोवर्णात्म
कश्चेतिध्वन्यात्मकोभेर्यादौवर्णात्मकसंस्कृतभाषादिरूपः ॥

काशसमवेतमित्यर्थः शब्दंविभजते सद्वितिशब्दः द्वौविधौप्रकारौयस्यसतथेत्यर्थः द्वैविध्यंव्युत्पादयति
ध्वनीति ध्वनिः आत्मास्वरूपंयस्यसतथावर्णः आत्मास्वरूपंयस्यसतथेत्यर्थः ध्वनिस्वरूपः शब्दोभेर्याद्य
वच्छिन्नआकाशइत्यर्थः वर्णस्वरूपः शब्दः संस्कृतभाषारूपइत्यर्थः गलताल्वाद्यवच्छिन्नआकाशइत्यर्थः
॥ ॥ ॥

बुद्धिं निरूपयति सर्वेति सर्वे च ते व्यवहाराश्चाऽऽदानगमनादयस्तेषां हेतुः साधारणं कारणं ज्ञानं बुद्धिरित्य
र्थः लक्षणं च जानामीत्यनुव्यवसायगम्यज्ञानत्वजातिमदिति बुद्धिज्ञानयोः समानार्थत्वात् बुद्धिं विभजते सेति
एवं वदर्थो बोध्यः द्वैविध्यमुपपादयति स्मृतीति तत्र स्मृतिलक्षणमाह संस्कारेति संस्कारमात्रजन्यं ज्ञानं
स्मृतिरित्यर्थः ज्ञानं स्मृतिरित्युक्तेऽनुभवेऽतिव्याप्तिस्तद्वारणाय संस्कारेत्यादि तावन्मात्रोक्तौ संस्कारध्वं

सर्वव्यवहारहेतुर्बुद्धिर्ज्ञानं सा द्विविधा स्मृतिरनुभवश्च संस्कारमात्रजन्यं ज्ञानं स्मृतिः
तद्भिन्नं ज्ञानमनुभवः स द्विविधः यथार्थोऽयथार्थश्च ॥

सेतिप्रसंगस्तद्वारणाय ज्ञानमिति तथापि प्रत्यभिज्ञायामतिव्याप्तिस्तद्वारणाय मात्रेति तदर्थश्च संस्कारेतरा
न्यत्वे सति संस्कारजन्यत्वं प्रत्यभिज्ञायाः सन्निकर्षजन्यत्वान्नातिव्याप्तिस्तथाप्यसंभवः सर्वज्ञानस्यात्ममनो
जन्यत्वात् तद्वारणाय संस्कारेतरपदं बहिरिन्द्रियपरं बहिरिन्द्रियाजन्यत्वे सति संस्कारजन्यं ज्ञानमिति सम्यक् अनुभ
वं निरूपयति तद्भिन्नमिति स्मृतिभिन्नं ज्ञानमित्यर्थः ज्ञानमित्युक्ते स्मृतावतिव्याप्तिस्तद्वारणाय स्मृतिभिन्नमिति
स्मृतित्वावच्छिन्नयावत्स्मृतिभिन्नमित्यर्थः अनुभवं विभजते स इति एवं च द्वैविध्यमुपपादयति यथार्थेति

त॰टी॰
१८

यथार्थानुभवं लक्षयति तद्वतीति तदस्यास्तीति तद्वान् तस्मिन् तत्प्रकारो यत्र स तथा तेनायं घटत्वादिपरं
घटत्वादिमति घटादौ घटत्वादिप्रकारकोऽनुभवः स यथार्थानुभव इत्यर्थः यथा अयं घट इति अनुभवो
यथार्थानुभवः स्मृतौ अयथार्थे च अतिव्याप्तिस्तद्वारणाय तत्प्रकारक इति तावन्मात्रेऽपि तत्रैवातिव्याप्तिस्तद्वा

तद्वति तत्प्रकारकोऽनुभवो यथा
र्थः सैव प्रमेत्युच्यते ॥ ॥

रणाय तद्वतीति विशेषणमात्रोक्तौ रजतत्वादावतिव्याप्तिस्तद्वारणाय विशेष्यं न तु अन्यप्रकारकोऽनुभवो
द्विविधः प्रमा अप्रमा चेत्युक्तम् अत्रैव कथमित्यत आह सैवेति यथार्थानुभव एव प्रमेति उच्यते शास्त्रकारै
रिति शेषः सूर्याय नमः ॥

१८

अयथार्थानुभवं लक्षयति तदभाववतीति तस्य अभावस्तदभावः सोऽस्यास्तीति तदभाववान् तस्मिन् तदभाववति
इत्यर्थः तत्प्रकारो यस्य स तत्प्रकारकश्चानुभवोऽयथार्थानुभव इत्युक्ते यथार्थानुभवे ऽतिव्याप्तिस्तद्वारणाय तत्प्रकार
क इति तथापि तत्रैवातिव्याप्तिस्तद्वारणाय तदभाववतीति अनुभवपदादानं स्मरणादौमेवेति न दोषः यथार्थानुभवे
(ऽवतिव्याप्तिस्तद्वारणाय तदपि देय)

तदभाववति तत्प्रकारकश्चायथार्थः यथार्थानुभवश्चतुर्विधः प्र
त्यक्षानुमित्युपमितिशाब्दभेदात् ॥ ॥

विभजते यथार्थानुभव इति स्मृतिः पूर्ववद्बोध्येति चातुर्विध्ये हेतुमाह प्रत्यक्षेति प्रत्यक्षं चानुमितिश्चोपमि
तिश्च शाब्दश्च तेषां भेदस्तस्मादित्यर्थः ननु कार्यभेदे कारणभेदो नियामक इति कारणभेदं विना अनुभवभ
वभेदः कथमित्यपेक्षायामाह तत्करणमिति तस्याः प्रमायाः करणमित्यर्थः चत्वारो विधयः प्रकारा यस्य
तथेत्यर्थः ॥

त॰दी॰
१९

चातुर्विध्यंदर्शयतिमाह प्रत्यक्षेति प्रत्यक्षमस्यातिप्रत्यक्षंअनुमीयतेऽनेनेत्यनुमानंउपमीयतेअनेनेत्युपमानं
शब्दश्चप्रसिद्धएवसमासश्चद्वंद्वैकवचनंचेत्यर्थः तत्करणमित्यत्रकरणंकिमित्यतईश्वरादावतिव्याप्ति
स्तद्वारणायासाधारणेति तावन्मात्रोक्तौघटत्वादावति प्रसंगस्तस्यघटासाधारणधर्मत्वात् तद्वारणाय
कुट२ स्याकांक्षायामाह असाधारणेति यथाघटादेर्दंडादिःकारणंकरणमि२

तत्करणमपिचतुर्विधम्प्रत्यक्षानुमानोप
मानशब्दभेदात्असाधारणंकारणंकरणम्

कारणमपीति तत्रासाधारणत्वंचव्यापारवत्त्वंव्यापारश्चद्रव्यान्यत्वेसतितज्जन्यत्वेसतितज्जन्यत्वेसतितज्जन्यजनक
त्वमितियथादंडेनघटेजननीयेदंडचक्रसंयोगोदंडजन्यघटजनकत्वात्व्यापारइत्यर्थः ॥ ॥

१९

कारणज्ञानं विना कारणत्वाभावात् कारणं लक्षयति अनन्यथेति अन्यथासिद्धम् अनन्यथासिद्धं नियतं
च तत्पूर्ववर्ति नियतपूर्ववर्ति कार्यस्य नियतपूर्ववर्ति कार्यनियतपूर्ववर्ति अनन्यथासिद्धं च तत्कार्यनियतपू
र्ववर्ति अनन्यथासिद्धकार्यनियतपूर्ववर्ति तस्य भावस्तत्त्वं कारणत्वमित्यर्थः वर्तित्वं कारणत्वमित्युक्तौ कार्य

अनन्यथासिद्धकार्यनियतपूर्ववर्तित्वं कारणत्वम् ॥

तिव्याप्तिस्तद्वारणाय पूर्वेति पूर्ववर्तित्वमित्युक्तौ रासभादावतिव्याप्तिस्तद्वारणाय नियतेति नियतपूर्व
वर्तित्वमित्युक्तावपि दण्डत्वादावतिव्याप्तिस्तद्वारणायानन्यथासिद्धेति तावन्मात्रोक्तौ पुनः कार्यं प्रति प्रसंगा
त्तद्वारणाय नियतेत्यादि इति तत्रानन्यथासिद्धत्वं अन्यथासिद्धभिन्नत्वम् अन्यथासिद्धत्वं च अवश्यक्लृप्तनियत
पूर्ववर्तिन एव कार्यसंभवे तद्भिन्नत्वमित्यर्थः ॥

त॰दी॰
२०

कार्यं लक्षयति प्रागभावेति प्राक् चासावभावश्च प्रागभावस्तस्य प्रतियोगि कार्यमित्यर्थः प्रतियोगिकार्यमित्यु
क्ते कालादावतिव्याप्तिस्तस्यापि कालिकादिसंबन्धेन प्रतियोगित्वात् तद्वारणाय प्रागभावेति नावश्यकेपि ईश्वरादा
वतिव्याप्तिस्तस्याप्यन्योन्याभावप्रतियोगित्वात् तद्वारणाय प्रागिति कारणं विभजते कारणमिति सुगमति(?) एव
वद्धैध्ये(?)ति त्रैविध्ये हेतुमाह समवायीति कारणमिति निबध्यते सर्वत्रेति समासः एवंविधेय(?)श्चेति समवायिका

प्रागभावप्रतियोगि कार्यं कारणं त्रिविधं समवाय्यसमवायिनिमित्तभेदात् यत्सम
वेतं कार्यमुत्पद्यते तत्समवायिकारणं यथा तन्तवः पटस्य पटश्च स्वगतरूपादेः ॥

निव्या

रणं लक्षयति यदिति यस्मिन्समवेतमित्यर्थः यस्मिन्समवेतं कार्यमुत्पद्यते तत्समवायिकारणमित्यर्थः यथा
घटस्य कपालमिति यदुत्पद्यते तत्समवायिकारणमित्युक्ते कार्येऽतिव्याप्तिस्तद्वारणाय कार्यमिति तथा
पि तत्रैवातिव्याप्तिस्तद्वारणाय समवेतमिति तथापि तत्रैवापि कारणमुदाहरति यथेति तन्तवः पटस्य समवायिका
रणमित्यर्थः पटश्च स्वसमवेतरूपादेः समवायिकारणमित्यर्थः ॥ ॥ ॥ ॥

वसम

२०

असमवायिकारणं लक्षयति कार्येणेति कार्येण सह एकस्मिन्नर्थे समवेतत्वे सति यत् कारणं तत्
असमवायिकारणमिति यद्वा कारणेन कार्यसमवायिकारणेन सह एकस्मिन्नर्थे समवेतत्वे सति यत्का
रणं तदसमवायिकारणमित्यर्थः आद्यमुदाहरति यथेति तन्तुसंयोगः पटस्यासमवायिकारणं कथमित्य
त्र मानैकार्येण पटेन सह एकस्मिन्नर्थे तन्तौ समवेतत्वे सति तन्तुसंयोगः पटकारणमित्यर्थः यतस्तन्तुसंयो
गोपि तन्तुषु समवेतः पटोपि तन्तुष्वेव समवेत इति द्वितीयमुदाहरति तन्तुरूपमिति तन्तुरूपं पटरूपस्यासमवाय॰

॰णासमवायिकारण १

कार्येण कारणेन वा सहैकस्मिन्नर्थे समवेतत्वे सति यत्कारणं तदसमवा
यिकारणं यथा तन्तुसंयोगः पटस्य तन्तुरूपं पटरूपस्य ॥

कारणं कथं इति चेत् पटसमवेतं पटरूपं तत्समवायिकारणं पटस्तेन सह तन्तुरूपं एकस्मिन्नर्थे तन्तौ समवेतत्वे
सति यत्तन्तुरूपं कारणं तत् तन्तुरूपं असमवायिकारणं पटरूपासमवायिकारणमित्यर्थः यतः पटरूपएका
र्यं तत्समवायिकारणं पटोपि तन्तुसमवेतः तन्तुरूपमपि तन्तुसमवेत इत्यर्थः यद्वा समवायसंबंधेन तन्तौ वर्तते तन्तुसं
योगः समवायसंबंधेन तन्तुषु वर्तते पटस्यासमवायिकारणं द्वयोः समवायसंबंधेन तन्तुवृत्तित्वात् असमवायिसम
वायसंबंधेन तन्तुवृत्ति पटरूपं प्रति स्वसमवायसंबंधेन तन्तुरूपमसमवायिकारणमिति स्वपदेन पटरूपं तत्सम

कार्येण पटरूपेण समवायसंबंध इति एवमग्रे अपि बोध्यम्

२२

वायित्वं समवायिसंबंधेनावृत्ति कार्यस्य पटरूपस्य कारणेन तं
तुरूपेण स्वसमवायिसमवायसंबंधः कारणस्य तन्तुरूपस्य

त॰टी॰
२१

निमित्तकारणं लक्षयति तदिति तच्चेदमुभयं तदुभयं तस्मात् भिन्नं तदुभयभिन्नं तत्र यदं समवायिकारणासमवा
यिकारणपदेन यावत्समवायिकारणासमवायिकारणोभयभिन्नकारणं निमित्तकारणमित्यर्थः कारणं निमि
त्तकारणमित्युक्ते द्वयोरपि तत्र संयोगस्य द्वारणाय समवायिकारणादिभिन्नेति तावन्मात्रोक्तौ कारणत्वेनिय
स्मिन् कपालत्वादावतिव्याप्तिस्तद्वारणाय कारणमिति निमित्तकारणमुदाहरति यथेति तुरी च वेमा च तुरीवेमे
ते आदी यस्य तत्तथा तन्तुपटस्य निमित्तकारणमित्यर्थः एवमन्यत्रापि बोध्यं करणं लक्षयति तदेवेति यदसा

तदुभयभिन्नं कारणं निमित्तकारणं यथा तुरीवेमादिकं पटस्य तदेव त्रिविधकारणम
ध्ये यदसाधारणं कारणं तदेव करणं तत्र प्रत्यक्षज्ञानकरणं प्रत्यक्षम् ॥

त्कारणं लक्षयति तदेवेति एवं वर्त्तते तस्मादेवमिति त्रिविधं यत्कारणं तन्मध्ये यदसाधारणं कारणं व्यापारवत्का
रणं तदेव करणमित्यर्थः तथा च कपालस्य कपालद्वयसंयोगद्वारा घटकारणत्वेन तुरीवेमसंयोगद्वारा
पटकारणत्वमिति यतः प्रत्यक्षादिप्रमाणलक्षणसिद्ध्यर्थं करणलक्षणादिवाक्यसंदर्भ उक्तस्ततः प्रत्यक्षप्रम
तत्प्रमाणं लक्षयति तत्रेति तेषु प्रत्यक्षादिप्रमाणेषु मध्ये प्रत्यक्षं च तज्ज्ञानं तस्य करणं प्रत्यक्षप्रमाणमित्यर्थः कर
णं प्रत्यक्षमित्युक्ते दण्डादावतिव्याप्तिस्तद्वारणाय ज्ञानेति तावन्मात्रोक्तौ ज्ञानादावतिव्याप्तिस्तद्वारणाय प्रत्यक्षेति

२१

प्रत्यक्षप्रमाणलक्षणाकोटौ शविष्टं प्रत्यक्षं तन्न किमित्याकांक्षायां प्रत्यक्षप्रमां लक्षयति इंद्रियेति इंद्रियं चक्षु
र्घटश्चैतौ तयोः सन्निकर्षः संयोगादिसंबंधस्तेन जन्यं यत् ज्ञानं तत्प्रत्यक्षमित्यर्थः यथा श्रयं घट इति ज्ञानं प्रत्यक्षमि
त्यन्वैः प्रत्यक्षमित्याह ध्वंसातिव्याप्तिसंहारणाय जन्यमिति ज्ञानवत्सत्त्वेऽपि तत्रैवातिव्याप्तिसंहारणायेंद्रियार्थेति सं

इंद्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम् तद्द्विवि
धं निर्विकल्पकं सविकल्पकं चेति ॥

न्यायलक्षणमात्रोक्तौ इंद्रियार्थसंयोगध्वंसे तिव्याप्तिसंहारणाय ज्ञानमिति प्रत्यक्षं विभजते तद्द्विविधमिति प्रत्यक्षमि
त्यर्थः उत्पत्तिः पूर्वं वृद्धौ ध्येनिर्हैविध्यं उत्पादयति निर्विकल्पकमित्यादि विकल्प एव विकल्पको विकल्पके
न रहितं निर्विकल्पकं विकल्प एव विकल्पको विकल्पकेन सहितं सविकल्पकमित्यर्थः ॥

तत्रनिर्विकल्पकंलक्षयतितत्रेतितयोर्मध्यइत्यर्थःप्रकारताःविषयकंनिर्विकल्पकमित्यर्थःनच्चानेनीद्रियमि
तिज्ञानेनिर्विकल्पकमित्युक्तौस्मरणादावतिव्याप्तिस्तद्वारणायप्रकारतेत्यादितावन्मात्रोक्तौघटादावति-
व्याप्तिस्तद्वारणायज्ञानमितिसविकल्पकंलक्षयतिसप्रकारकमितिप्रकारपदंविशेष्यताद्युपलक्षकंन

तत्रनिष्प्रकारकंज्ञानंनिर्विकल्पकंयथाकिंचिदितिसप्रकारकंज्ञा
नंसविकल्पकंयथाडित्थोयंब्राह्मणोयंश्यामोयमिति ॥

याचप्रकारताविशेष्यतादिविषयकंज्ञानंसविकल्पकमित्यर्थःज्ञानंसविकल्पकमित्युक्तौनिष्प्रकार
केऽतिव्याप्तिस्तद्वारणायप्रकारतेत्यादितावन्मात्रोक्तौघटादावतिव्याप्तिस्तद्वारणायज्ञानमित्यर्थःब्राह्म
णत्वजातिमानयमितिश्यामरूपवान
यमित्यर्थः ॥ ॥

र्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षमित्युक्तं तत्र प्रत्यक्षज्ञानहेतुरिंद्रियार्थसन्निकर्षः कतिविध इत्याकांक्षायामा
ह प्रत्यक्षेति प्रत्यक्षं च तद्ज्ञानं तस्य हेतुरित्यर्थः इंद्रियार्थयोः सन्निकर्षः षड्विधः षट्प्रकार इत्य
र्थः तमेवोपपादयति संयोग इत्यादि इंद्रियनिरूपितसंयोगः १ इंद्रियनिरूपितसंयोगाश्रये समवायः २

प्रत्यक्षज्ञानहेतुरिंद्रियार्थसन्निकर्षः षड्विधः संयोगः सं
युक्तसमवायः संयुक्तसमवेतसमवायः समवायः समवे
तसमवायः विशेषणविशेष्यभावश्चेति ॥

इंद्रियनिरूपितसंयोगाश्रयसमवेते समवायः ३ शब्दप्रतियोगिश्रोत्रानुयोगिकसमवायः ४ सम
वेते समवायः ५ विशेषणं च विशेष्यं च ते तयोर्भावः विशेषणभावो विशेष्यभावश्चेत्यर्थः ६ ॥

तत्रसंयोगमुदाहरति चक्षुषेति चक्षुषेतिपदमिंद्रियोपलक्षकंघटपदंद्रव्योपलक्षकं तथाचइंद्रियेणद्र
व्यप्रत्यक्षजननेसंयोगः सन्निकर्षः कारणमित्यर्थः द्रव्यविषयकप्रत्यक्षेसंयोगसंबंधेनइंद्रियंकारणमि
त्यपिवोध्यंसंयुक्तसमवायसन्निकर्षमुदाहरति घटेति इंद्रियाणातिसंबध्यतेसर्वत्ररूपपदंद्रव्यसमवेतपरं

चक्षुषाघटप्रत्यक्षजननेसंयोगः सन्निकर्षः घटरूपप्रत्यक्षेसंयु
क्तसमवायः चक्षुःसंयुक्तेघटेरूपस्यसमवायात् ॥ ॥

तथाच इंद्रियेणद्रव्यसमवेतप्रत्यक्षेसंयुक्तसमवायः सन्निकर्षः कारणंयथारूपवानयंघटइतिप्रत्यक्षे
संयुक्तसमवायसंबंधेनइंद्रियंकारणमित्यपिवोध्यमत्रहेतुमाह चक्षुरिति चक्षुःपदमिंद्रियोपलक्षकंइं
द्रियनिरूपितसंयोगाधिकरणेद्रव्येघटादौद्रव्यसमवेतस्यरूपादेःसमवायात् ॥ ॥ ॥

संयुक्तसमवेतसमवायमुदाहरति रूपत्वेति रूपत्वपदं द्रव्यसमवेतसमवेतपरं तथाच इंद्रियेणद्रव्य
समवेतरूपादिसमवेतरूपत्वादिविषयकप्रत्यक्षे इंद्रियनिरूपितसंयोगाधिकरणद्रव्यघटादिसमवेत
रूपादिसमवायसंबंधः इत्यर्थः द्रव्यसमवेतसमवेतप्रत्यक्षे इंद्रियनिरूपितसंयोगाश्रयसमवेतसमवा

रूपत्वसामान्यप्रत्यक्षे संयुक्तसमवेतसमवा
यसन्निकर्षः चक्षुः संयुक्ते घटे रूपं समवेतं त
त्र रूपत्वस्य समवायात् ॥

यसंबंधेन इंद्रियं करणमित्यपि बोध्यम् तत्र हेतुमाह चक्षुरिति इंद्रियनिरूपितसंयोगाश्रये द्रव्ये घ
टादौ समवेतरूपादिकं तत्र रूपत्वादेः समवायादित्यर्थः ॥

समवायसन्निकर्षस्तदाह इति श्रोत्रेणेति श्रोत्रेंद्रियेण शब्दविषयकसाक्षात्कारे जननीये समवायः संबंधः कारणमित्यर्थः कथमित्यपेक्षायामाह कर्णेति कर्णविवरेति कर्णविवरेतर्यावर्त्तते इति कर्णविवरवर्त्ति तच्चेदमा- काशं च कर्णविवरवर्त्त्याकाशं तस्य श्रोत्रत्वादित्यर्थः तथा च कर्णच्छिद्रावच्छिन्नमाकाशं श्रोत्रेंद्रियमिति शब्द

श्रोत्रेण शब्दसाक्षात्कारे समवायः सन्निकर्षः कर्णविवरवर्त्त्याकाश स्य श्रोत्रत्वात् शब्दस्याकाशगुणत्वात् गुणगुणिनोश्च समवायात् ॥

स्याकाशविशेषगुणत्वात् इति गुणगुणिनोश्च समवायस्य प्रसिद्धत्वात् इति समवायस्य संबंधस्य एव संबं- धः द्विष्ठ एव श्रोत्रानुयोगिकः समवायः शब्दप्रतियोगिकः समवायः श्रोत्रे कार्यं चात्र शब्दसाक्षात्का- रः तथा च शब्दविषयकसाक्षात्कारे श्रोत्रानुयोगिकसमवायसंबंधेन श्रोत्रेंद्रियं कारणमित्यर्थः ॥ ॥

समवेतसमवायसन्निकर्षमुदाहरति शब्दत्वेति श्रोत्रेंद्रियेणेति संबध्यते श्रोत्रेंद्रियेण शब्दत्वविषयकसाक्षा-
त्कारजननीये समवेतसमवायः सन्निकर्षः कारणमित्यर्थः शब्दत्वविषयकसाक्षात्कारे समवेतसमवायसं-
बंधेन श्रोत्रेंद्रियं कारणमित्यवोध्यं तत्र हेतुमाह श्रोत्रेति श्रोत्राज्ञानयोगिके समवायाश्रये शब्दे शब्दत्वस्य समवा-
यात् इत्यर्थः विशेषणविशेष्यभावसन्निकर्षमुदाहरति अभावेति इंद्रियेणेति संबध्यते तथा च इंद्रियेण

शब्दत्वसाक्षात्कारे समवेतसमवायसन्निकर्षः श्रोत्रसमवेते शब्दे शब्दत्वस्य समवा-
यात् अभावप्रत्यक्षे विशेषणविशेष्यभावः सन्निकर्ष इह भूतले घटो नास्तीत्यत्र
विशेष्यभावः सन्निकर्षः चक्षुः संयुक्ते भूतले घटाभावस्य विशेष्यत्वात् ॥

अभावविषयकप्रत्यक्षे जननीये इंद्रियसंयुक्तविशेषणताख्य इंद्रियसंयुक्तविशेष्यताख्य सन्निकर्षः अ-
भावविषयकप्रत्यक्षे विशेषणताविशेष्यताख्यसन्निकर्षेणेंद्रियं कारणमित्यपि बोध्यं विशेष्यतासन्निकर्षमभि-
नयति इहेति एतदभिन्नभूतलवृत्तिघटप्रतियोगिकाभावः अत्र विशेष्यतासंबंधो वर्तते भूतलवृत्तेर्विशेषण-
त्वं घटाभावस्य विशेष्यत्वं प्रसिद्धमिति तत्र हेतुमाह चक्षुरिति चक्षुरूपेंद्रियनिरूपितसंयोगाश्रयभूतले घटाभाव

विशेषणसन्निकर्षमुदाहरति घटाभाववदिति घटाभावनिष्ठविशेषणतानिरूपितविशेष्यताशालिभूत

लमित्यर्थः अत्र घटाभावस्य विशेषणत्वं भूतलस्य विशेष्यत्वं प्रसिद्धमेवेति विशेषणतासंबंधे हेतुमाह घटे

ति घटरूपेंद्रियनिरूपितसंयोगाधिकरणभूतले यद्घटप्रतियोगिकघटाभावस्य विशेषणत्वेन वर्तमानत्वा

घटाभाववद्भूतलमित्यत्र चक्षुःसंयुक्ते भूतले घटाभावस्य विशेष
णत्वात् एवं सन्निकर्षजन्यज्ञानं साक्षात्कारः तत्करणमिंद्रियं त
स्मादिंद्रियं प्रत्यक्षप्रमाणमिति सिद्धम् इति प्रत्यक्षम् ॥

दित्यर्थः यदेतावता ग्रंथसंदर्भेण सिद्धं तत्स्मारयति एवमिति एवं सति इंद्रियनिरूपितविषयसंबंधेन जन्यं
यद् ज्ञानं स साक्षात्कारः यस्मात् तस्य करणमिंद्रियं तस्मात् इंद्रियं प्रत्यक्षप्रमाकरणमिति न्यायसिद्धांते सिद्ध
मित्यर्थः इति श्रीसंग्रहदीपिकायां प्रत्यक्षखण्डः समाप्तः ॥ ॥ ॥

उद्देशक्रमानुरोधेन प्रथमं तेन निरूप्यानुमानं निरूपयति अनुमितीति अनुमितेः करणं यस्येति बहुव्रीहा
वसंभवः तद्वारणाय तत्पुरुषेति अनुमितेः करणमनुमितिकरणं लक्षणं अनुमानमिति लक्ष्यं अनुमान
स्यानुमितिकरणत्वात् लक्षणसमन्वयः करणमित्युक्तमाने चक्षुरादिकरणेऽतिव्याप्तिस्तद्वारणाय अनुमितीति
मितित्वं नन्वनकरणमनुमानमित्युक्तौ प्रत्यक्षज्ञानकरणे इन्द्रियेऽतिव्याप्तिस्तद्वारणायानुमितीति तथा च अनु
मितिकरणमनुमानमित्युक्ते न दोषः अथानुमानलक्षणकोटिप्रविष्टानुमितिः केत्याकांक्षायामाह परा

अनुमितिकरणमनुमानं परामर्शजन्यं ज्ञानमनुमितिः व्याप्तिविशिष्टपक्षधर्मता
ज्ञानं परामर्शः यथा वह्निव्याप्यधूमवानयं पर्वत इति ज्ञानं परामर्शः ॥

र्शेति परामर्शजन्यं यत् ज्ञानं सानुमितिः ज्ञानमनुमितिरित्युक्तौ ईश्वरप्रत्यक्षादावतिव्याप्तिस्तद्वारणा
य जन्यमिति तावदुक्ते घटादावतिव्याप्तिस्तद्वारणाय जन्यज्ञानमिति तावदुक्तेऽपि पुनः प्रत्यक्षादावतिव्याप्ति
स्तद्वारणाय परामर्शेति परामर्शजन्यमित्युक्ते परामर्शध्वंसेऽतिव्याप्तिस्तद्धंसस्यापि तज्जन्यत्वात् तद्वारणाय ज्ञानमि
ति तथोक्तौ पुनर्न दोषः उक्तानुमितिलक्षणकोटिप्रविष्टः परामर्शः कः इति जिज्ञासायामाह व्याप्तीति व्याप्त्या
विशिष्टो व्याप्तिविशिष्टः पक्षस्य धर्मता पक्षधर्मता तस्याः ज्ञानं व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्श इत्यर्थः ज्ञानेप

उ

त॰दी॰
२५

अनुमितिमुदाहरति तज्जन्यमिति परामर्शजन्यमित्यर्थः ननु परामर्शलक्षणाकोटिप्रविष्टव्याप्तिपक्षधर्मते
के इत्यपेक्षायां सोदाहरणं व्याप्तिं दर्शयति यत्रेति यस्मिन्नधिकरणे धूमस्तस्मिन्नधिकरणे वह्निरिति साहचर्यमि
ति सहचरतीति सहचरस्तस्य भावः साहचर्यं नाम समानाधिकरण्यं नाम एकाधिकरणवृत्तित्वं तस्य नि
यमोऽस्मिन्नेव धूमवह्न्योरधिकरणवृत्तित्वनियमो व्याप्तिरित्यर्थः पक्षधर्मतां दर्शयति व्याप्यस्येति व्याप्यस्याना
म व्याप्यत्वाश्रयो व्याप्तिविशिष्टो वा व्याप्तिमान् तस्य व्याप्यस्य हेतोः पर्वतादिवृत्तित्वं पक्षधर्मतेत्यर्थः यथा धू

तज्जन्यं पर्वतो वह्निमानिति ज्ञानमनुमितिः यत्र धूमस्तत्राग्निरिति साहचर्यनिय
मो व्याप्तिः व्याप्यस्य पर्वतादिवृत्तित्वं पक्षधर्मता अनुमानं द्विविधं स्वार्थं परार्थं च

मवान्पर्वतवृत्तिरिति वृत्तित्वमात्रोक्तौ घटादिनिष्ठवृत्तित्वादावतिव्याप्तिस्तद्वारणाय पक्षवृत्तित्वमिति तावदुक्ते प
र्वतत्वनिष्ठवृत्तित्वेऽतिव्याप्तिस्तद्वारणाय व्याप्यस्येति तथोक्तौ न दोषः अनुमानं कतिविधमिति जिज्ञासाया
मनुमानं विभजते अनुमानमिति द्वौ विधौ प्रकारौ यस्य तदित्यर्थः द्वैविध्यमुपपादयति स्वार्थमिति अनुमान
मिति संबध्यते तथा च स्वार्थानुमानं परार्थानुमानमित्यर्थः स्वस्यार्थः प्रयोजनमिति यस्मात्तत्स्वार्थं स्वार्थं च
तदनुमानं स्वार्थानुमानं परस्यार्थः प्रयोजनं यस्मात्तत् परार्थं च तदनुमानं परार्थानुमानमित्यर्थः ॥

२५

तत्र स्वार्थानुमानं निरूपयति स्वार्थमिति स्वस्य पार्थ्यनुमितिः तस्याः हेतुः स्वार्थानुमानमित्यर्थः हेतुरित्यस्यार्थमाह हेतौ
दृष्टे इति व्याप्तिस्मरणायमितिहेतुः तावन्मात्रे चेत्तर्हि दावति व्याप्तिस्मरणायानुमितिहेतुः तावन्मात्रे परार्थानुमाने
ति व्याप्तिस्मरणाय स्वानुमितिहेतुः ततो न दोषः स्वयमेव कश्चिदेकदा यस्मिन्नग्न्यधिकरणो धूमः तस्मिन्नग्न्यधिकरणो धू
मः तस्मिन्नग्न्यधिकरणो धूमः तस्मिन्नग्न्यधिकरणो अग्न्यधिकरणो अग्निरेव तद्रूपेणाभूयः सहचारं प्रमेण महानसादिदेशे धूमो

स्वार्थं स्वानुमितिहेतुः तथाहि स्वयमेव भूयोदर्शनेन यत्र धूमस्तत्राग्निरिति महानसादौ व्या
प्तिं गृहीत्वा पर्वतसमीपं गतः तद्गते चाग्नौ संदिहानः पर्वते धूमं पश्यन् व्याप्तिं स्मरति यत्र धू
मस्तत्राग्निरिति तदनन्तरं वह्निव्याप्यधूमवान् पर्वत इति ज्ञानमुत्पद्यते अयमेव लिंगपरा
मर्श इत्युच्यते तस्मात् पर्वतो वह्निमानिति ज्ञानमनुमितिरुत्पद्यते तदेतत्स्वार्थानुमानम् ॥

वह्निव्याप्यपर्वतंदृश्ये व्याप्तिमनुभूय व्याप्तिविषयकानुभवस्तज्जन्यसंस्कारवान् पर्वतसमीपं गतः पर्वतसमीपेश्च
त्रेमाति अस्मिन् पर्वते अग्निर्वा नेति संशयवान् भवति तदनन्तरं पर्वते धूमविषयको योऽयं धूम इति साक्षात्कारवान् भवति तदनं
तरमेकस्मिन्नेव यित्तानुमपरामर्शपित्सार्कुमितिन्यायेन धूमो वह्निव्याप्य यत्र धूमस्तत्राग्निर्वेति इत्याकारकं व्याप्तिस्मरणं तस्य भव
ति तस्य तदनन्तरं वह्निरूपितव्याप्त्याश्रयो धूमस्तद्वान् पर्वत इति ज्ञानमुत्पद्यते तन्नु व्याप्तिज्ञानानन्तरं लिंगपरामर्शो भवति इति
हि नियमः तथा च वह्निव्याप्य(ति) धूमवान् पर्वत इति पदज्ञानानन्तरं किमुत्पद्यते इत्याकांक्षायामाह अयमेवेति शास्त्रकारैः अयमेव लिंग

परामर्श इत्युच्यते तस्माल्लिंगपरामर्शात्त्वन्निजानलिंगपराम
र्शात्तस्मादनुमितिर्जायते तेन तस्मादेव लिंगपरामर्शः स्वार्थानुमान
मित्यर्थः ॥

त॰टी॰
२०

परार्थानुमानं दर्शयति यत्त्वित्यादिना ननु परार्थानुमानं नाम परस्मादनुमितिहेतुरिति हेतुः परार्थानुमानमे
तावन्मात्रोक्तौ चरहेतुः देशस्तत्रातिव्याप्तिस्तद्वारणाय मितिहेतुरिति तर्हि नैतस्य हेतोर्लिङ्गादिस्तत्रातिव्याप्तिस्तद्वा
रणायानुमितिहेतुरितिश्चेदनुमितिहेतुः परार्थानुमानमित्युक्तौ स्वार्थानुमानेऽतिव्याप्तिस्तद्वारणाय परस्येति
परसमवेतायामनुमितेः पक्षोद्देश्यकसाध्यविधेयकज्ञानपर्यवसितं तस्य हेतुः परार्थानुमानमित्यर्थः कथं परार्थान
मितिहेतुत्वं परार्थानुमानस्येत्याकाङ्क्षायां विशदयति यत्त्वित्यादिना पञ्चावयववाक्यं प्रयुङ्क्त इति स्वयं। ॥

तो वह्निमानित्याकार

यत्तु स्वयं धूमादग्निमनुमाय परं प्रतिबोधयितुं पञ्चावयववाक्यं प्रयुङ्क्ते
तत्परार्थानुमानं यथा पर्वतो वह्निमान् धूमवत्त्वात् ॥ ॥ ॥

कश्चिदेवं वदतो परं पञ्चावयववाक्यं प्र
युङ्क्ते तत्परार्थानुमानमित्यन्वयः पञ्च च तेऽवयवाश्चावयवा यस्मिन् तत्पञ्चावयवम् पञ्चावयवं च तद्वाक्य
मिति विग्रहः किं कृत्वा स्वयं धूमात् धूमज्ञानात् अग्निमनुमाय अग्निसाध्यकामनुमितिं कृत्वेत्यर्थः किमर्थं [illegible]
मत्यपार्थमपरस्मात्सं प्रतिपाद्यः परस्य अग्निसाध्यकानुमितिस्तदर्थमित्यर्थः कथं तत्पञ्चावयववाक्यं तदाह यथे
ति पर्वत इति अग्निरस्यास्तीति अग्निमानित्येकः ऊनः इत्याकांक्षायां धूमवत्त्वादिति धूमोऽस्यास्तीति धूमवान् तस्य भा

२०

भवतु धूमवत्वं तथापि अग्निमत्वं कथमित्याकांक्षायामाह योयइति योयो धूमोऽस्यास्तीति धूमवान्ससोऽग्निमान्।
यथामहानसमित्यर्थः भवतीदृशोमहानसंतथापिपर्वतःकथमीदृशइत्याकांक्षायामाह तथाचायमिति अयंपर्व
तस्तथाचनामवह्निनिरूपितव्याप्तिविशिष्टधूमवानित्यर्थः एवमपिवह्निमताकथमितिजिज्ञासायामाह तस्मा
दिति वह्निव्याप्यधूमवत्वात् तथावह्निमानित्यर्थः अनेनउक्तेनपंचावयववाक्येन प्रतिपादितात् बोधितात्

योयोधूमवान्ससोऽग्निमान्यथामहानसः तथाचायंतस्मात्तथेतिअनेनप्रतिपादि
तात्लिंगात्परोप्यग्निंप्रतिपद्यतेप्रतिज्ञाहेतूदाहरणोपनयनिगमनानि ॥

गपरामर्शात् परोपि अन्योपिद्वितीयोपिपुरुषोऽग्निंप्रतिपद्यते अनुमिनोति अग्निंजानातीत्यर्थः तेपंचावयवाः
किंनामानइत्याकांक्षायामाह प्रतिज्ञेति प्रतिज्ञाचहेतुश्चउदाहरणंचउपनयश्चनिगमनंचतानिप्रतिज्ञाहेतू
दाहरणोपनयनिगमनानीत्यर्थः ॥

पंचावयवाइत्यावयवाइत्यर्थः प्रतिज्ञामभिनयति पर्वतइति पक्षेसाध्यवत्ताबोधकंवचनंप्रतिज्ञेत्यर्थः हे
तुमभिनयति धूमवत्त्वादिति पंचम्यंतंतत्तीयांतलिंगप्रतिपादकंवचनंधूमवत्त्वादित्याकारकंहेतुरितिउ
दाहरणंदर्शयति योयइति हेतुमत्ताबोधकत्वेसतिसाध्यवत्ताबोधकंदृष्टांतवचनमुदाहरणमिति उपनयं

पंचावयवापर्वतोऽग्निमानितिप्रतिज्ञाधूमवत्त्वादितिहेतुः योयोधूमवान्ससो
ऽग्निमान्यथामहानसइत्युदाहरणंतथाचायमित्युपनयःतस्मात्त
थेतिनिगमनम् ॥

दर्शयति तथाचायमिति लिंगपरामर्शबोधकंपक्षवचनमुपनयः वह्निव्याप्यधूमवानयमित्याकारक
मिति निगमनंदर्शयति तस्मात्तथेति लिंगपरामर्शबोधकत्वेसतिसाध्यविशिष्टपक्षबोधकवचनंनिग
मनंवह्निव्याप्यधूमवत्त्वात्वह्निमान्पर्वतइत्याकारकमिति ॥ ॥ ॥

यतः स्वीयलिंगपरामर्शात् स्वस्यानुमितिर्जायते पंचावयववाक्यबोधितलिंगपरामर्शात् परस्यानुमितिर्जायते
द्वयोरनुमित्योर्लिंगपरामर्श एव करणमित्यर्थः उपसंहरतीति तस्मादिति द्वयोरनुमित्योर्लिंगपरामर्शस्य क-
रणत्वाल्लिंगपरामर्शोनुमानम् ननु लिंगपरामर्शोनुमानमित्युक्तं तत्र लिंगं कतिविधमित्याकांक्षायां लिंगं
विभजते लिंगमिति त्रयो विधयः प्रकारा यस्य तत्तथेत्यर्थः त्रैविध्यमेव प्रदर्शयति अन्वयव्यतिरेकि इति अन्व-
यश्च व्यतिरेकश्च तौ अन्वयव्यतिरेकौ तौ विद्येते यस्मिन् तत् अन्वयव्यतिरेकि यत्सत्त्वे यत्सत्त्वमन्वयः यदभावे य-

स्वार्थानुमितिपरार्थानुमित्योर्लिंगपरामर्श एव करणं तस्माल्लिंगपरामर्शो
नुमानं लिंगं त्रिविधं अन्वयव्यतिरेकि केवलान्वयि केवलव्यतिरेकि चेति अन्व-
येन व्यतिरेकेण च व्याप्तिमदन्वयव्यतिरेकि ॥ ॥

दभावो व्यतिरेकः केवलोन्वयो यस्मिन् तत्के-
वलान्वयि केवलो व्यतिरेको यस्मिन् तत्केवलव्यतिरेकीति विभागः तत्रान्वयव्यतिरेकि दर्शयति अन्वयेनेति
हेतौ साध्यनिरूपितत्वमित्यर्थः तस्य च व्याप्त्यन्वयः अन्वयनिरूपितव्याप्तिमत्त्वे सति व्यतिरेकनिरूपितव्याप्तिमत्त्वं य-
ल्लिंगं तत् अन्वयव्यतिरेकीति लक्षणं विशेषणमात्रकृतौ केवलान्वयिन्यतिव्याप्तिवारणाय विशेष्यदले तावन्मात्रे

केवलव्यतिरेकि [illegible] ॥

त॰ दी॰
२९

उदाहरति यथेति यस्मिन्नधिकरणे धूमस्तस्मिन्नधिकरणे ऽग्निरित्यन्वयनिरूपितव्याप्तिर्धूमेऽस्ति हेतोर्व्याप्यत्वा
त् अन्वयव्याप्तौ उक्तं च अन्वये साधनं व्याप्यं साध्यं व्यापकमिष्यते साध्याभावोऽन्यथा व्याप्यो व्यापकः साधना
त्ययः १ व्याप्यस्य वचनं पूर्वं व्यापकस्य ततः परं एवं परीक्षिता व्याप्तिः स्फुटीभवति तत्त्वतः २ इति वचनात्
व्याप्याश्रयो व्याप्यः इति विग्रहाच्च वह्निनिरूपितान्वयव्याप्त्याश्रयत्वं धूमेऽस्तीति अथ कथं व्यतिरेकनिरूपित

यथा वह्नौ साध्ये धूमवत्त्वं यत्र धूमस्तत्राग्निरित्यन्वयव्याप्तिः यत्र वह्निर्नास्ति
तत्र धूमोऽपि नास्ति यथा महाह्रद इति व्यतिरेकव्याप्तिः ॥

व्याप्तिर्धूमे इति जिज्ञासायामाह यथेति यस्मिन्नधिकरणे वह्न्यभावः तस्मिन्नधिकरणे धूमाभावो महाह्रदे प्र
सिद्धा व्यतिरेकनिरूपितव्याप्तिः सा कथं धूमे धूमाभावनिरूपितव्याप्तेर्वह्न्यभावे वर्तमानत्वात् इति चेदुच्य
ते साध्याभावव्यापकीभूताभावप्रतियोगित्वं व्यतिरेकव्याप्तित्वम् वह्न्यभावव्यापकीभूतधूमाभावप्रतियो
गित्वं धूमाभावेऽस्तीति व्यतिरेकव्याप्तित्वम् ॥

२९

केवलान्वयिनं दर्शयति अन्वयमात्रेति अन्वय एव अन्वयमात्रं अन्वयमात्रेण व्याप्तिर्यस्मिन् तत् अन्वयमात्रव्या

प्तिकं तथा च अन्वयेतरानिरूपितव्याप्त्यभाववत्त्वे सति अन्वयनिरूपितव्याप्तिमत् यल्लिंगं तत् केवलान्वयि विशे

षणमात्रोक्तौ पत्तेः इति प्रसंगः व्याप्यव्यापकपदार्थस्य सिद्धापनसाध्यरूपत्वात् तद्वारणाय विशेष्यदलं तावन्मा

अन्वयमात्रव्याप्तिकं केवलान्वयि यथा घटोभिधेयः

प्रमेयत्वात् पटवदिति अत्र च प्रमेयत्वाभिधेयत्वयो

र्व्यतिरेकव्याप्तिर्नास्ति सर्वस्य प्रमेयत्वादभिधेयत्वाच्च

त्रोक्तौ अन्वयव्यतिरेकिण्यतिव्याप्तिस्तद्वारणाय विशेषणादलं उभयोक्तौ न कुत्रापि दोषः उदाहरति य

थेति घट अभिधाविषयः शक्यो वाच्य इति यावत् प्रमाविषयत्वात् इत्यर्थः ॥ ॥

व्यतिरेकिणां दर्शयति व्यतिरेकमात्रेति व्यतिरेक एव व्यतिरेकमात्रं तेन व्याप्तिर्यस्मिन् तत् व्यतिरेकमात्रव्या
प्तिकं यल्लिंगं तत् केवलव्यतिरेकि व्यतिरेकेतरनिरूपितव्याप्त्यभाववत्वे सति व्यतिरेकनिरूपितव्याप्तिमद्
यल्लिंगं तत्केवलव्यतिरेकीत्यर्थः यल्लिंगं तत्केवलव्यतिरेकीत्युक्तो मन्देनावतिप्रसंगस्तद्वारणाय व्याप्तिम

व्यतिरेकमात्रव्याप्तिकं केवलव्यतिरेकि यथा पृथिवीत
रेभ्यो भिद्यते गंधवत्वात् ॥ ॥ ॥

दिति तत्र व्याप्तित्वैवापि प्रसंगस्तद्वारणाय व्यतिरेकनिरूपितेति तावन्मुक्तोऽन्वयव्यतिरेकिण्यतिव्याप्ति
स्तद्वारणाय विशेषणं विशेषणमात्रोक्तौ पदेऽतिव्याप्तिस्तद्वारणाय विशेष्यम् उभयोक्तौ न कुत्रापि दोषः
उदाहरति यथेति पृथिवीत्वावच्छिन्ना पृथिवी इतरेभ्यो जलादिभ्यो भिद्यते जलादिभेदवती समवायेन गंध

वत्वादित्यर्थः ॥

व्यतिरेकव्याप्तिमभिनीयप्रदर्शयतियदीतियदितरभेदाभाववत्तत्गंधाभाववदित्यर्थः साध्याभावहेत्व
भावयोरेकं ऽधिकरणंदृष्टांतार्थंकथयतियथेति उपनयंदर्शयति नचेयमिति इयंपृथिवीनतथा इतरभे
दाभावव्यापकीभूतगंधाभाववतीनेत्यर्थः निगमनंदर्शयति तस्मादिति इतरभेदाभावव्यापकीभूतगं

यदितरेभ्योनभिद्यतेनतद्गंधवत् यथाजलंनचेयंन
तथातस्मान्नतथेति अत्रयद्गंधवत्तदितरभिन्नमित्य
न्वयदृष्टांतोनास्तिपृथिवीमात्रस्यपक्षत्वात् ॥

धाभावाभाववतीत्वात् नतथा इतरभेदाभाववतीन किंतु इतरभेदवतीत्यर्थः दृष्टांताभावेनान्वय
व्याप्त्यभावंदर्शयति अत्रेति अस्मिन्ननुमानप्रयोगेयद्गंधवत्तदितरभेदवत् यथायमिति अन्वयदृष्टा
न्ताभावः पृथिवीत्वावच्छिन्नायाः सर्वस्याः पृथिव्याः पक्षत्वात् पृथिव्याः सकाशादन्यत्रद्रव्येसमवायेनगं

धूमोत

ननु पक्षत्वादिमत्त्वं किं नाम पक्षत्वमिति जिज्ञासायामाह संदिग्धेति संदेहविषयं संदिग्धं स चासौ साध्यः संदि
ग्धसाध्यो ऽस्यास्तीति संदिग्धसाध्यवान् पक्ष इत्यर्थः साध्यवान्पक्ष इत्युक्तौ सपक्षे ऽतिव्याप्तिरतः संदिग्धे
ति तावदुच्यमाने नैवेति संशयविषये धूमे ऽतिव्याप्तिरतः साध्येति पर्वतपन्थागो वह्निर्नवेति संशयविषये साध्ये
ऽतिव्याप्तिरतः संदिग्धसाध्यवानिति वक्तव्यं पुनर्न दोषः उदाहरति यथेति धूमवत्त्वे हेतौ तावद्विषयीभूते सति ।

न॰टी॰
३१

संदिग्धसाध्यवान्पक्षः यथा धूमवत्त्वे हेतौ पर्वतः निश्चि
तसाध्यवान्सपक्षः यथा तत्रैव महानसः ॥

संदेहविषयान्निरूपसाध्यवान्सन्सर्वतः पक्षो भवतीत्यर्थः सपक्षं निरूपयति निश्चितेति निश्चितविष
यो निश्चितः स चासौ साध्यो निश्चितसाध्यो ऽस्यास्तीति निश्चितसाध्यवान्स सपक्ष इत्यर्थः साध्यवान्सपक्ष इत्यु
च्यमाने पक्षे ऽतिव्याप्तिस्तद्वारणाय निश्चितेति तावदुच्यमाने ध्रुवधूमस्तिनिश्चितविषये धूमे ऽतिव्याप्तिस्तद्वारणा
य साध्येति साध्यांते ऽनुच्यमाने वह्निरयमिति निश्चितविषये वह्निरूपे साध्ये ऽतिव्याप्तिस्तद्वारणाय निश्चितसाध्यवा
न्सपक्ष इत्याच पुनर्न दोषः उदाहरति यथेति धूमवत्त्वे हेतौ तावन्न समये नाना निश्चितवह्निमान्सन्महानसः सपक्षो

विपक्षं निरूपयति निश्चितेति साध्यस्य अभावः साध्याभावः निश्चितश्चासौ साध्याभावो निश्चितसाध्याभावः
निश्चितसाध्याभावः सोऽस्यास्तीति निश्चितसाध्याभाववान् विपक्ष इत्यर्थः अभाववान् विपक्ष इत्युच्यमाने घ
टाभाववति भूतले ऽतिव्याप्तिस्तद्वारणाय साध्याभाववानिति तावन्मात्रे उक्ते ऽतिव्याप्तिस्तद्वारणाय निश्चि
तेत्यादि तथा च न दोषः उदाहरति यथेति धूमवत्त्वे हेतौ तानेहृदे वह्न्यभावो निश्चितो भवतीत्यर्थः प्रसंगात् हेत्वा

निश्चितसाध्याभाववान्विपक्षः यथा तत्रैव महाहृदः सव्यभिचारविरुद्धसत्प्रति
पक्षासिद्धबाधिताः पंचहेत्वाभासाः सव्यभिचारो नैकांतिकः ॥ ॥

भासान् विभजते सव्यभिचारेति हेत्वाभासाः पंचकेते सव्यभिचारादिबाधितान्ताः तत्र हेतुवदाभासन्त इति
हेत्वाभासाः व्यभिचारः साध्याभाववद्वृत्तिः तेन सहितः सव्यभिचारः साध्यविरोधवान् विरुद्धोऽस्त्यस्येति विरुद्ध
विरोधी पक्षो यस्य स सत्प्रतिपक्षः असिद्धिरस्यास्तीति असिद्धः बाधः साध्याभावः सोऽन्यतोऽस्येति बाधितः ततो

हेत्वाभासविवेकः ॥

तत्र सव्यभिचारं विभजते स इति त्रैविध्यं व्युत्पादयति साधारणेति साधारणं निरूपयति तत्रेति साध्यस्याभावः सा
ध्याभावः सोऽस्यास्तीति साध्याभाववान् साध्याभाववति वृत्तिर्यस्य स साध्याभाववद्वृत्तिः साधारणोऽनैकान्तिकः
नैकस्मिन्नधिकरणे साध्येन सह नो निश्चयो यस्य हेतोः स अनैकान्तिक इत्यर्थः उदाहरति यथेति असाधारणं निरू
पयति सर्वेति सपक्षाश्च विपक्षाश्च सपक्षविपक्षाः सर्वे च ते सपक्षविपक्षाः सर्वसपक्षविपक्षास्तेभ्यो व्यावृत्तो नाम

स त्रिविधः साधारणासाधारणानुपसंहारिभेदात् तत्र साध्याभाववद्वृत्तिः साधार
णोऽनैकान्तिकः यथा पर्वतोऽग्निमान् प्रमेयत्वादिति प्रमेयत्वस्य वह्न्यभाववति ह्र
दे विद्यमानत्वात् सर्वसपक्षविपक्षव्यावृत्तः पक्षमात्रवृत्तिरसाधारणः ॥

भिन्नवृत्तिः सर्वसपक्षविपक्षव्यावृत्त इत्येवांशो यो हेतुः स असाधारण इत्यर्थः हेतावसाधारणे लक्ष्यमाणे सहेतावति
व्याप्तिस्तद्वारणाय व्यावृत्त इति तथापि सहेतावतिव्याप्तिस्तस्याधिकस्याभावात् अन्नवृत्ते तद्वारणाय विपक्षव्यावृत्त इ
ति तावत्युक्ते केवलव्यतिरेकिण्यपि हेतावतिव्याप्तिस्तद्वारणाय सपक्षेति सपक्षव्यावृत्त इत्युच्यमाने साधारणे तिव्याप्ति
स्तद्वारणाय विपक्षव्यावृत्त इति सर्वग्रहणे तु नापि न दोषः ॥ ॥ ॥ ॥

उदाहरति यथेति नित्यः शब्दत्वं नित्येभ्यः आकाशादिभ्यो व्यावृत्तं तत्र न प्रवर्तते अनित्येभ्यो घटपटादिभ्यो व्यावृ
त्तं तत्रापि न प्रवर्तते शब्देतरावृत्तित्वे सति शब्दवृत्तिः अनुपसंहारिणं दर्शयति अन्वयेति अन्वयश्च व्यतिरेकश्च अ।
न्वयव्यतिरेकौ अन्वयव्यतिरेकयोर्दृष्टान्तस्तेन रहितो हेतुरनुपसंहारी इत्यर्थः अन्वयदृष्टान्तरहितत्वे सति व्यतिरे

यथा शब्दो नित्यः शब्दत्वात् इति शब्दत्वं सर्वेभ्यो नित्येभ्यो व्यावृत्तं शब्द
मात्रवृत्तिः अन्वयव्यतिरेकदृष्टान्तरहितोऽनुपसंहारी यथा सर्वम
नित्यं प्रमेयत्वात् अत्र सर्वस्यापि पक्षत्वात् दृष्टान्तो नास्ति ॥

कदृष्टान्तरहितो हेतुरनुपसंहारीत्यर्थः हेतुरनुपसंहारी स्यात्कौ सहेतावन्वितव्याप्तिस्मारणाय दृष्टान्तो हि न इति।
तावत्स्यात्कौ केवलव्यतिरेकिण्यपि व्याप्तिस्मारणाय व्यतिरेकस्यादिना तावन्मात्रे कौ केवलान्वयिन्यपि व्याप्तिस्मा
रणाय अन्वयेति तावन्मात्रे कोऽपि नः केवलव्यतिरेकिण्यपि व्याप्तिरतः उभयदलेन तथा च पुनर्न दोषः ॥

न॰टी॰
३३

विरुद्धं निरूपयति साध्याभावेति साध्यस्य यो ऽभावः साध्याभावः साध्याभावेन व्याप्तिः साध्याभावव्याप्तिः सा ऽ
स्यास्तीति साध्याभावव्याप्तः दृशो यो हेतुः स विरुद्ध इत्यर्थः हेतौ विरुद्धत्वस्य च्युमाने सद्धेतावतिव्याप्तिस्तद्वारणाय
ऽभावव्याप्त इति तथापि तत्रैवातिव्याप्तिस्तद्वारणाय साध्याभावेति पुनरपि सद्धेतावतिव्याप्तिर्यत्र धूमस्तत्र वन्ह्य
सोस्याभावः पर्वतो वह्निमानिति प्रतीतेस्तद्वारणाय याभावपदं साध्यासत्ताभावपरं तथा च न दोषः उदाहरति यथेति

साध्याभावव्याप्तो हेतुर्विरुद्धः यथा शब्दो नित्यः कृतकत्वादिति कृतकत्वं हि नि
त्यत्वाभावेन ऽनित्यत्वेन व्याप्तम् साध्याभावसाधकं हेत्वन्तरं यस्य स सत्प्रतिपक्षः
यथा शब्दो नित्यः श्रावणत्वात् शब्दत्ववत् शब्दो ऽनित्यः कार्यत्वात् घटवत् ॥

निरूपयति कृतकत्वं नाम कार्यत्वं नित्यत्वाभावेनानित्यत्वेन व्याप्तं यत्र कार्यत्वं तत्र नित्यत्वाभावो ऽनित्यत्वं इति शसि
द्धः सत्प्रतिपक्षं निरूपयति साध्याभावेति साध्यस्य यो ऽभावः साध्याभावः साध्याभावस्य साधके साध्याभावसाधके
यस्य हेतोः साध्याभावस्य साधकं हेत्वन्तरं नाम द्वितीयो हेतुर्विद्यते स हेतुः सत्प्रतिपक्ष इत्यर्थः हेतुः सत्प्रतिपक्ष इत्युक्तौ स
द्धेतावतिव्याप्तिस्तद्वारणाय साध्याभावेति तावन्मात्रोक्तौ विरुद्धे ऽतिव्याप्तिस्तद्वारणाय हेत्वन्तरमिति न दोषः उदाहरति य
थेति यस्य श्रावणत्वस्य हेतोः साध्यस्य नित्यत्वस्याभावस्यानित्यत्वस्य साधको द्वितीयो हेतुः कार्यत्वं वर्तते ऽनित्यश्रावणा

असिद्धं विभजते असिद्ध इति असिद्धिरस्यास्तीति असिद्धः स च त्रिविधः त्रयो विधयः प्रकारा यस्य स इत्यर्थः त्रैविध्यमु
पपादयति आश्रयेति आश्रयस्य असिद्धिः सा अस्यास्तीति आश्रयासिद्धो नाम पक्षासिद्धः हेतोः स्वरूपस्य पक्षे असिद्धिः
स्वरूपासिद्धिः सा अस्यास्तीति स्वरूपासिद्धः व्याप्तेराश्रयो व्याप्यस्तस्य भावो व्याप्यत्वं व्याप्यत्वस्यासिद्धिर्व्याप्यत्वा
सिद्धिः सा अस्यास्तीति व्याप्यत्वासिद्धः तत्राश्रयासिद्धमुदाहरति आश्रयासिद्धो यथेति मूलस्य स्पष्टार्थमिति स्वरूपासिद्ध

असिद्धस्त्रिविधः आश्रयासिद्धः स्वरूपासिद्धो व्याप्यत्वासिद्धश्चेति तत्राश्रयासिद्धो यथा गग
नारविंदं सुरभि अरविंदत्वात् सरोजारविंदवत् अत्र गगनारविंदमाश्रयः स च नास्त्येव स्वरूपा
सिद्धो यथा शब्दो गुणः चाक्षुषत्वादित्यत्र चाक्षुषत्वं शब्दे नास्ति शब्दस्य श्रावणत्वात् सोपाधि
कोव्याप्यत्वासिद्धः ॥

मुदाहरति स्वरूपासिद्धो यथेति चाक्षुषत्वात् चक्षुरिंद्रियजन्यप्रत्यक्षविषयत्वा
त् असिद्धमुपपादयति चाक्षुषत्वं शब्दे न प्रवर्तते शब्दस्य श्रावणत्वात् श्रवणेंद्रियजन्यप्रत्यक्षविषयत्वस्य प्रसिद्धत्वादि
त्यर्थः व्याप्यत्वासिद्धं निरूपयति सोपाधिक इति उपाधिरेव उपाधिकः उपाधिकेन सहितः सोपाधिको हेतुर्व्याप्यत्वा
सिद्धः आर्द्रैंधनव्याप्यधूमाभाववह्नौ निवसंवन्धेनार्द्रैंधनोपाधिविशिष्टो वह्निर्व्याप्यत्वासिद्धः ॥

उपाधिलक्षणमाह साध्येति साध्यस्य साध्यत्वेनाभिमतस्य व्यापकत्वे सति साधनस्य साधनत्वेनाभिमतस्याव्याप
क उपाधिरित्यर्थः यथार्द्रेन्धनसंयोगः साध्यत्वेनाभिमतस्य धूमस्य व्यापकः साधनत्वेनाभिमतस्य वह्नेरव्याप
कः प्रसिद्ध एवेति लक्षणसमन्वयः विशेषणमात्रोक्तौ वह्निरूपहेतोरुपाधित्वं स्यात् वह्नेर्धूमरूपसाध्यव्यापकत्वा
त् तद्वारणाय विशेष्यभागः विशेष्यमात्रोक्तौ साध्यस्य धूमस्योपाधित्वं स्यात् धूमस्य वह्न्यव्याप्यत्वात् तद्वारणाय
विशेषणदलं उभयोक्तौ न कुत्राप्यतिव्याप्तिः साध्यव्यापकत्वं लक्षयति साध्येति साध्यस्य समानाधिकसाध्यस्य सा

साध्यव्यापकत्वे सति साधनाव्यापकत्वमुपाधिः साध्यसमानाधिकरणात्यन्ताभा-
वाप्रतियोगित्वं साध्यव्यापकत्वम् ॥ ध्यसमानाधिकरणः साध्याधिकरणवृत्तिः स चासौ अत्यं
ताभावः साध्याधिकरणवृत्त्यत्यंताभावस्तस्याप्रतियोगी साध्याधिकरणवृत्त्यत्यंताभावाप्रतियोगी तस्य भावस्तत्त्वं तदे
व साध्यव्यापकत्वं यथा साध्यस्य धूमस्याधिकरणे पर्वतादौ वृत्तिर्यः अत्यन्ताभावो घटाद्यत्यन्ताभावस्तस्याप्रतियोगी
घटादिः प्रतियोगी आर्द्रेन्धनसंयोगस्य एव उपाधिरित्यर्थः अत्यन्ताभावप्रतियोगित्वमात्रोक्तौ घटात्यन्ताभावाप्रतियोगी
पटस्तत्रातिव्याप्तिस्तद्वारणाय वृत्तीति तथापि तत्रैवातिव्याप्तिस्तद्वारणायाधिकरणेति तथापि तत्रैवातिव्याप्तिस्तद्वा
रणाय साध्याधिकरणेति तथा च तत्र नातिव्याप्तिरिति पटस्यापि धूमाधिकरणवृत्त्यत्यंताभावप्रतियोगित्वादार्द्रेन्धनस्य

तादृशात्यंताभावाप्रतियोगित्वेति सिद्धम्

साधनाव्यापकत्वंनिरूपयति साधनेति साधनमस्यास्तीतिसाधनवान् साधनवतिनिष्ठायस्यससाधन
वन्निष्ठः साधनवन्निष्ठश्चासौअत्यंताभावःसाधनवन्निष्ठात्यंताभावः तस्यप्रतियोगीसाधनवन्निष्ठात्यंताभाव
प्रतियोगीतस्यभावस्तत्त्वंसाधनाव्यापकत्वंसाधनाधिकरणवृत्त्यत्यंताभावप्रतियोगित्वंयथावह्निरूपसा
धनाधिकरणेतप्तायोगोलकेतस्मिन्वृत्तिरत्यंताभावश्चार्द्रैंधनसंयोगस्यतस्यप्रतियोगीआर्द्रैंधनसंयोगः।

साधनवन्निष्ठात्यंताभावप्रतियोगित्वंसाधनाव्यापकत्वंयथापर्वतो
धूमवान्वह्निमत्त्वादित्यार्द्रैंधनसंयोगस्योपाधित्वात्सोपाधिकत्वं
यत्रधूमस्तत्रार्द्रैंधनसंयोग इतिसाध्यव्यापकता ॥

त्तदेवसाधनाव्यापकत्वमित्यर्थः प्रतियोगित्वमात्रोक्तौसर्वत्रातिव्याप्तिः सर्वस्यघटत्वपटत्वादिप्रतियोगित्वा
त् तद्वारणायाभावेति एवमप्यतिव्याप्तिस्तदवस्थैवेतद्वारणायवृत्त्यत्यंताभाव इतितथापिघटवतिव्याप्ति।
स्तद्वारणायसाधनाधिकरणेतितथाचवह्न्याधिकरणेतप्तायःपिंडवृत्तिरार्द्रैंधनसंयोगात्यंताभावप्रतियोगि
त्वमार्द्रैंधनसंयोगेभवत्येवेति ॥

एवंसाध्यनिष्ठव्याप्तिनिरूपकत्वेसतिसाधननिष्ठव्याप्त्यनिरूपकत्वात् आर्द्रेन्धनसंयोगस्योपाधित्वंव्याप्यसा
ध्याभाववद्वृत्तित्वस्वरूपसंबंधेनसोपाधिकत्वात् वह्निमत्वव्याप्यत्वासिद्धंबाधितंतत्वपतितस्येतिसाध्यस्या
भावःसाध्याभावःयस्यहेतोःसाध्याभावःप्रमाणेननिश्चयविषयःसहेतुर्बाधितइत्यर्थःएवंचप्रमाणासिद्धसा
ध्याभावविशिष्टपक्षवृत्तिहेतुर्बाधितःइतिलक्षणपर्यवसन्नम् हेतुर्बाधितइत्यनुमानेसद्धेतावतिव्याप्ति

यत्रवह्निस्तत्रार्द्रेन्धनसंयोगइतिनास्तिअयोगोलकेआर्द्रेन्धनाभावात् एवंचसा
ध्यव्यापकत्वेसतिसाधनाव्यापकत्वात्आर्द्रेन्धनसंयोगस्योपाधित्वात्वह्नि
मत्वंव्याप्यत्वासिद्धंयस्यसाध्याभावःप्रमाणान्तरेणनिश्चितःयथावह्निरनु
ष्णोद्रव्यत्वादितिअत्रानुष्णत्वंसाध्यंतदभावउष्णत्वंस्पर्शनप्रमाणेनगृह्यतइति

त्तद्धारणायपक्षवृत्तीतिएवंचपुनरपितत्रैवातिव्याप्तिस्तद्धारणायसाध्याभावविशिष्टेति पक्षविशेषणंतथा
प्यसाधारणेतिव्याप्तिस्तद्धारणायप्रमाणसिद्धेतिसाध्याभावविशेषणंतथाचपुनर्नदोषःउदाहरतिपृथ्वीति
अस्मिन्ननुमानप्रयोगेअनुष्णत्वंसाध्यंतस्याभावःउष्णत्वम् तच्चत्वगिन्द्रियजन्यस्पर्शनेनप्रत्यक्षप्रमाणेनगृ
ह्यतेनिश्चीयतेइतिबाधितत्वंद्रव्यत्वस्येत्यर्थःइतिपरहेत्वाभासेअनुमानखण्डंसमाप्तम् ॥

उपमितेः करणमुपमितिकरणं इति लक्षणं उपमानमिति लक्ष्यं तच्च सादृश्यज्ञानं करणमुपमानं इत्यन्वयो घट
करणादौ अतिव्याप्तिस्तद्वारणाय मितीति मितिज्ञानं तत्करणं चक्षुरादिकं तत्रातिव्याप्तिस्तद्वारणाय उपमिति
रेतावदुक्तेऽसम्भवस्तद्वारणाय करणमिति तथा च शब्दानन्तरदोषः ननु उपमानलक्षणे कोऽयं विशिष्टा उपमितिः सा
केति जिज्ञासायामुपमितिं लक्षयति संज्ञेति संज्ञा च संज्ञी च तौ संज्ञासंज्ञिनौ तयोः संबन्धस्य ज्ञानमुपमितिः

उपमितिकरणमुपमानं संज्ञासंज्ञिसंबंधज्ञानमुपमितिः तत्करणं सादृश्यज्ञानं त
थाहि कश्चिद्गवयशब्दार्थमजानन् कुतश्चिदारण्यकपुरुषाद्गोसदृशो गवय इ
ति श्रुत्वा वनं गतो वाक्यार्थं स्मरन् गोसदृशं पिंडं पश्यति ॥

नामार्थयोर्वाच्यवाचकभावसम्बन्धः ज्ञानमुपमितिरित्यर्थः यथा गवयो गवयपदवाच्य इति ज्ञानमित्युक्तौ घ
टत्वादावतिव्याप्तिस्तद्वारणाय सम्बन्धेति तावदुक्तौ घटसम्बन्धवत्कपालमिति व्याप्तिः व्याप्तिस्तद्वारणाय संज्ञासं
ज्ञि इति तु न कोऽपि दोषः उदाहरति तथाहीति यद्युपमितेः करणमुपमानं तथा निरूपयति यतः पश्यति इत्यन्तेनेत्य
र्थः ॥

तदनन्तरमिति अतिदेशवाक्यार्थस्मरणानन्तरमित्यर्थः सादृश्यज्ञानं करणं अतिदेशवाक्यार्थस्मरणं व्यापारः
गवयो गवयपदवाच्य इत्याकारकोपमितिः फलं इति संग्रहदीपिकायामुपमानखण्डः शब्दप्रमाणं निरूपयति आप्त
ति आप्तस्य वाक्यं आप्तवाक्यं तदेव शब्दप्रमाणमित्यर्थः वाक्यमित्युक्तौ भ्रान्तवाक्येऽतिव्याप्तिस्तद्वारणाय आप्तेति
आप्तमात्रोक्तौ असम्भवस्तद्वारणाय वाक्यमिति प्रमाणमिति सम्बध्यते आप्तलक्षणमाह आप्तस्त्विति यथार्थ

तदनन्तरमयं गवयशब्दवाच्य इत्युपमितिरुत्पद्यते इत्युपमानम्
आप्तवाक्यं शब्दः आप्तस्तु यथार्थवक्ता वाक्यं पदसमूहः ॥

वक्तेति यथार्थवक्ता स एव आप्त इत्यर्थः वक्ता आप्त इत्युच्यमाने भ्रान्तपुरुषेऽतिव्याप्तिस्तद्वारणाय यथार्थेति तावन्मा
त्रोक्ते मन्त्रपुरुषेऽतिव्याप्तिस्तद्वारणाय यथार्थेति यथार्थ इत्युक्तेः सम्भवस्तद्वारणाय वक्तेत्यपि समस्तपदोक्तौ न दोषः
वाक्यलक्षणमाह वाक्यमिति पदानां पदयोर्वा समूहः पदसमूह इत्यर्थः समूहो वाक्यमित्युक्तौ घटसमूहेऽतिव्याप्ति
स्तद्वारणाय पदेति तावन्मात्रोक्तौ एकस्मिन् पदेऽतिव्याप्तिस्तद्वारणाय समूह इति समस्तपदोक्तौ न दोषः ॥ ॥

उपदाहरति यथेति शुक्लाभिन्नगोकर्मकंदंडकरणकमदृष्टादिविषयानयनानुकूलकृतिमांस्त्वमिति वाक्यार्थबोधः
पदं निरूपयति शक्तमिति निरूपकतासंबंधेन यत् शक्त्यधिकरणं तत्पदमित्यर्थः शक्त्यधिकरणमिश्रकोपदार्थः ति।
व्याप्तिः पदार्थस्यनिरूप्यतासंबंधेनाशक्तिमत्वात् अतस्तद्वारणाय निरूपकेतितेनतथाचनदोषः शक्तिस्वरूपमा

यथागामानयशुक्लांदंडेनेतिशक्तंपदंअस्मात्पदादयम
र्थोबोद्धव्यइतीश्वरसंकेतःशक्तिः आकांक्षायोग्यतासं
निधिश्चवाक्यार्थज्ञानेहेतुः ॥

हृ अस्मादिति इदमपदेतरपंचम्यास्त्रभेदोऽर्थः पदेतरपंचम्यान्तत्वमर्थो बोद्धव्य इति एतत्पदजन्यबोधविषयो
र्थः तथा च स्वभिन्नउपस्थितपदजन्यबोधविषयोऽयमर्थ इतीश्वरसंकेतः शक्तिरित्यर्थः यथा च घटपदजन्यबोधविष
यो घटपदार्थ इत्यर्थः कारणांतरमाह आकांक्षेत्यादि चकारेण तात्पर्यज्ञानमपि हेतुर्बोध्यम् ॥

त·टी·
४२

आकांक्षां निरूपयति पदस्येति नञ्ननुभावकोऽननुभावकः अन्वयस्याननुभावकः अन्वयाननुभावकः तस्य भाव
स्तत्त्वं अन्यत् पदं पदांतरं पदांतरस्य व्यतिरेकः पदांतरव्यतिरेकः पदांतरव्यतिरेकेण प्रयुक्तं पदांतरव्यतिरेकप्रयुक्तं पदांतरव्य
तिरेकप्रयुक्तं च तत् अन्वयाननुभावकत्वं पदांतरव्यतिरेकप्रयुक्तान्वयाननुभावकत्वं एतत्पदस्य यत्पदांतराभाववत्त्वेन तत्
त्वन्वयबोधाजनकत्वं तत्पदस्य तत्पदस्याकांक्षेत्यर्थः यथा घटमिति पदस्यानयनपदांतराभाववत्त्वेन घटकर्मकानयना

पदस्य पदांतरव्यतिरेकप्रयुक्तान्वयाननुभावकत्वमाकांक्षा

नुकूलकृतिमांस्त्वमित्याकारकान्वयबोधाजनकत्वं घटमिति पदस्यानयेतिपदस्याकांक्षेत्यर्थः अन्वयाननुभा
वकत्वमित्युक्तौ आकांक्षारहिते पदेऽतिव्याप्तिस्तद्वारणाय पदांतरेत्यादि तथापि तत्रैवातिव्याप्तिस्तद्वारणाय यदिति
चेद् घटमिति पदस्यानयेतिपदांतराभाववत्त्वमन्वयाबोधकत्वमिति तत्रातिव्याप्तिस्तद्वारणाय एतत्पदस्येति तथा च
तत्पदोक्तेः पि च तेनान्वयबोधोऽनेन न दोषः ॥

३०

योग्यतां दर्शयति दर्थेति अर्थस्य अबाधो अर्थाबाधो योग्यतेत्यर्थः अबाधमात्रोक्तौ साकांक्षत्वात्मसत्त्वमेव वक्तव्यं तथा
च न दोषः सन्निधिं निरूपयति पदानामिति उच्चारणमित्युक्तौ विलंबोच्चरितमपि सन्निधिः स्यात् अतो अविलंबेनेति उच्चा
रणं च यांत्पदानामेवेति ननु वाक्यस्य प्रमाणत्वात् अनाकांक्षवाक्येनापि शाब्दीप्रमा स्यात् अत आह आकांक्षादीति अकां

अर्थाबाधो योग्यता पदानामविलंबेनोच्चारणं सन्निधिः तथा च आकांक्षादिरहितं वा
क्यमप्रमाणं यथा गौरश्वः पुरुषो हस्तीति न प्रमाणमाकांक्षाविरहात् अग्निना सिं
चेदिति न प्रमाणं योग्यताविरहात् एकैकशः प्रहरे असहोच्चारितानि गामानयश्च
क्कोरेदउनेत्यादिपदानि न प्रमाणं सन्निध्यभावात् ॥

क्षा आदिर्येषां ते आकांक्षादयः आकांक्षादिभिः
रहितं आकांक्षादिरहितं यद्वाक्यमित्युक्तौ आकांक्षादियुक्तमपि वाक्यमप्रमाणं स्यादित्याकांक्षादिरहितमिति तावन्मात्रोक्तौ
घटादावतिप्रसंगात् तद्वारणाय वाक्यमपीति नहि गौरश्वो भवति नहि च पुरुषो हस्ती भवतीति आकांक्षाभावादित्यर्थः अग्नि
नासिंचेदिति अग्निकरणकसेकानुकूलकृतिमानित्यर्थः योग्यताविरहात् योग्यताभावादित्यर्थः ॥

वाक्यं विभज्यते वाक्यमिति द्वैविध्यमुपपादयति वैदिकमिति वेदभवं वैदिकं लोके भवं लौकिकमित्यर्थः इति संग्रहदीपि
कायां यथार्थानुभवः समाप्तः अयथार्थानुभवं विभजते अयथार्थेति त्रैविध्यमुपपादयति संशयेति संशयं निरूपयति
एकस्मिन्निति नानाचेते धर्मा नानाधर्मा विरुद्धाश्च ते नानाधर्माश्च विरुद्धनानाधर्मा विरुद्धनानाधर्माणां वैशिष्ट्यावगाहि ज्ञानं सं

वाक्यं द्विविधं वैदिकं लौकिकं च वैदिकं त्वीश्वरोक्तत्वात्सर्वमेव प्रमाणं लौकिकं त्वा
प्तोक्तं प्रमाणं अन्यदप्रमाणं वाक्यार्थज्ञानं शाब्दज्ञानं तत्करणं शब्दः इति शब्दप्रमाण
म् यथार्थानुभवो निरूपितः अयथार्थानुभवस्त्रिविधः संशयविपर्ययतर्कभेदात्
एकस्मिन्धर्मिणि विरुद्धनानाधर्मवैशिष्ट्यावगाहि ज्ञानं संशयः यथा स्थाणुर्वा ७

= पुरुषो वा

शय इत्यर्थः ज्ञानं संशय इत्युक्ते यथार्थज्ञानेऽतिव्याप्तिस्तद्वारणाय वैशिष्ट्येति वैशिष्ट्यज्ञानं संशय इत्युक्तेऽपि त
त्रैवातिव्याप्तिस्तद्वारणाय धर्मेति धर्मविशिष्टज्ञानं संशय इत्युक्तेऽपि यथार्थानुभवेऽतिव्याप्तिस्तद्वारणाय नानेति त
थापि घटो द्रव्यं पृथिवीति ज्ञानेऽतिव्याप्तिस्तद्वारणाय एकस्मिन्निति उदाहरति यथेति ॥ ॥ ॥

विपर्ययलक्षणमाह मिथ्याज्ञानमिति तदभाववति तत्प्रकारकमित्यर्थः उदाहरति यथेति रजतत्वाभाववत्याः शु
क्तौ रजतत्वप्रकारकमित्यर्थः तर्कलक्षणमाह व्याप्येति व्याप्यस्यारोपो व्याप्यः व्याप्यस्यारोपो व्याप्यारोपस्तेन व्याप्या
रोपेण व्याप्तिनिरूपकं व्यापकं व्यापकस्यारोपो व्यापकारोपः स तर्क इत्यर्थः व्याप्यारोपस्येत्युच्यमाने वह्निर्न स्यादित्या
वत्तिज्ञाने ऽतिव्याप्तिस्तद्वारणाय व्यापकेति उदाहरति यथेति वह्न्यभावो व्याप्यो धूमाभावो व्यापकस्तदारोपस्तत्तर्कस

मिथ्याज्ञानं विपर्ययः यथा शुक्ताविदं रजतमिति व्याप्यारोपेण व्यापकारोपस्तर्कः
यथा यदि वह्निर्न स्यात् तर्हि धूमोऽपि न स्यादिति स्मृतिरपि द्विविधा यथार्था अयथा
र्था च प्रमाजन्या यथार्था अप्रमाजन्या अयथार्था ॥

वाद्यं तर्क इत्यर्थः इति संग्रहदीपिकायामयथार्थानुभवः समाप्तः स्मृतिं विभजते स्मृतिरिति यथार्थस्मृतिं निरू
पयति प्रमेति प्रमायथार्थेत्युच्यमाने लक्ष्ये असंभवः यथार्थानुभवे चातिव्याप्तिस्तद्वारणाय जन्येति तावन्मात्रे घटा
दावतिव्याप्तिस्तद्वारणाय प्रमेति अयथार्थस्मृतिं निरूपयति अप्रमेति अप्रमा यथार्थेति उच्यमाने लक्ष्ये असंभवः अ
यथार्थानुभवे चातिव्याप्तिस्तद्वारणाय जन्येति तावन्मात्रोच्यमाने घटादावतिव्याप्तिस्तद्वारणायाप्रमेति ॥

त॰दी॰
२५

सुखं निरूपयति सर्वेषामिति वेदनीयं सुखमित्युच्यमाने दुःखे ऽतिव्याप्तिस्तद्वारणाय अनुकूलमिति कदाचित्कस्यचित्कस्य
चित्कस्य दुःखमप्यनुकूलं भवत्यतो दुःखे ऽतिव्याप्तिस्तद्वारणाय सर्वेषामिति दुःखं निरूपयति सर्वेषामिति वेदनी
यं दुःखमित्युक्ते सुखे ऽतिव्याप्तिस्तद्वारणाय प्रतिकूलेति कदाचित्कस्यचित्कस्यचिद्विद्विष्टस्य विषयादिसुखमपि प्र
तिकूलवेदनीयं भवत्यतः सुखे ऽतिव्याप्तिस्तद्वारणाय सर्वेषामिति धर्मं निरूपयति विहितेति विहितं च तत्कर्म वि

सर्वेषामनुकूलवेदनीयं सुखं सर्वेषां प्रतिकूलवेदनीयं दुःखं इच्छा कामः क्रोधो द्वेषः ॥
कृतिः प्रयत्नः विहितकर्मजन्यो धर्मः निषिद्धकर्मजन्यस्त्वधर्मः बुद्ध्यादयोऽष्टावा
त्ममात्रविशेषगुणाः बुद्धीच्छाप्रयत्ना द्विविधा नित्या अनित्याश्च नित्या ईश्वरस्य अनित्या जीवस्य संस्कारस्त्रिविधः ॥

हितकर्म तेन जन्यो विहितकर्मजन्यो धर्म इत्यर्थः जन्यो धर्म इत्युच्यमाने घटादावतिव्याप्तिस्तद्वारणाय कर्मेति तावन्मात्रोक्ते
पापे ऽतिव्याप्तिस्तद्वारणाय विहितेति विहितकर्म इत्युक्ते कर्मण्यतिव्याप्तिस्तद्वारणाय जन्येति अधर्मं निरूपयति नि
षिद्धेति निषिद्धं च तत्कर्म निषिद्धकर्म तज्जन्यो ऽधर्म इत्यर्थः जन्यो ऽधर्म इत्युक्ते घटादावतिप्रसंगस्तद्वारणाय कर्मेति ता
वन्मात्रोक्ते धर्मे ऽतिव्याप्तिस्तद्वारणाय निषिद्धेति निषिद्धमात्रोक्ते कर्मण्यतिव्याप्तिस्तद्वारणाय जन्येति आत्ममात्रगुणाः आ

आत्मेतरावृत्तित्वे सति आत्मगुणा इत्यर्थः आत्मेतरा[illegible]विस
ति आत्मवृत्तयः आत्ममात्रवृत्तय इत्यर्थः ॥
२५

संस्कारं विभजते संस्कार इति त्रैविध्यं तु मादयति वेग इति वेगं निरूपयति पृथिव्यादीति पृथिवी आदिर्यस्य तत् पृथिव्या
दि चतत् चतुष्टयं पृथिव्यादिचतुष्टयं पृथिव्यादिचतुष्टयं च मनश्चेति तयोर्वृत्तिर्यस्य स पृथिव्यादिचतुष्टयमनोवृत्तिरि
त्यर्थः मनोवृत्तित्युक्ते स्पर्शे मनस्त्वादावतिव्याप्तिवारणाय पृथिव्यादीत्यादि पृथिव्यादिचतुष्टयवृत्तिरित्युक्ते स्पर्शे
तिव्याप्तिवारणाय मनोवृत्तिरिति तिनयापि संख्यापरत्वापरत्वे चातिव्याप्तिवारणाय संस्कारत्वे सतीति विशेषणं

संस्कारस्त्रिविधः वेगो भावना स्थितिस्थापकश्चेति वेगः पृथिव्यादिचतुष्टयमनोवृत्तिः
अनुभवजन्या स्मृतिहेतुर्भावना आत्ममात्रवृत्तिः ॥ ॥

भावनां लक्षयति अनुभवेति अनुभवेन जन्या अनुभवजन्या या स्मृतिस्तस्या हेतुः सा भावनेत्यर्थः यथा अपेक्ष
त्वमनुभवजन्या घटस्मृतिस्मृतिहेतुर्भावनेति लक्ष्ये लक्षणसमन्वयः हेतुरित्युक्ते दण्डेऽतिव्याप्तिवारणाय स्मृते
रनुभवजन्या घटस्मृति... तिनावस्थुक्तेऽनुभवेऽतिव्याप्तिवारणायानुभवेत्यादि अनुभवजन्येत्युक्तेऽनुभवध्वंसेऽतिप्रसंगवारणाय स्मृति
हेतुरिति तिनदाश्रयमाह आत्ममात्रेति आत्मेति वृत्तित्वे सति आत्ममात्रवृत्ति आत्ममात्रवृत्तिरित्यर्थः ॥

त॰ दी॰
५०

स्थितिस्थापकं निरूपयति अन्यथेति पूर्वस्थितिसापेक्षतयान्यप्रकारेणाकृतस्यापितस्य पुनरेवावस्थामापादकः संस्कारः
स्थितिस्थापक इत्यर्थः तदाश्रयमाह कटादीति कटादीत्यादिना शाखादिपरिग्रहः इति तर्कदीपिकायां गुणाः समाप्ताः उ
द्देशक्रमानुरोधेन गुणान्निरूप्य कर्माणि निरूपयन् तत्रादौ कर्मणः स्वरूपत्वात् स्वरूपं पश्यत् तत्र चलनात्मकं कर्मेत्यर्थः उत्क्षेप
णं निरूपयति ऊर्ध्वेति ऊर्ध्वश्चासौ देशश्च ऊर्ध्वदेशस्तस्य संयोगस्तस्य हेतुरुत्क्षेपणमित्यर्थः हेतुरित्युक्तौ उक्तौ जलादा
वतिव्याप्तिस्तद्वारणाय देशेति तथापि तत्रैव सा तद्वारणायोर्ध्वेति अपक्षेपणं लक्षयति अध इति अधश्चासौ देशश्चाधोदेश

अन्यथाकृतस्य पुनस्तदवस्थापादकः स्थितिस्थापकः कटादिपृथिवीवृत्तिरिति गुणाः ॥ च
लनात्मकं कर्म ऊर्ध्वदेशसंयोगहेतुरुत्क्षेपणं अधोदेशसंयोगहेतुरपक्षेपणं शरीरसन्निकृ
ष्टसंयोगहेतुराकुञ्चनं ॥ ॥

स्तस्य संयोगस्तस्य हेतुरपक्षेपणमित्यर्थः हेतुरित्युक्तौ दण्डादा
वतिव्याप्तिस्तद्वारणाय संयोगेति तावत्युक्तौ उत्क्षेपणेऽतिव्याप्तिस्तद्वारणाय देशेति तथापि तत्रैवातिव्याप्तिस्तद्वारणा
याध इति आकुञ्चनं लक्षयति शरीरेति सन्निकृष्टेन संयोगः सन्निकृष्टसंयोगः शरीरस्य सन्निकृष्टसंयोगः शरीरसन्नि
कृष्टसंयोगस्तस्य हेतुराकुञ्चनमित्यर्थः हेतुरित्युक्तौ तन्त्वादावतिव्याप्तिस्तद्वारणाय संयोगेति तथापि कपालद्वयेऽति
व्याप्तिस्तद्वारणाय सन्निकृष्टेति तथापि तत्रैवातिव्याप्तिस्तद्वारणाय शरीरेति ॥ ॥ ॥

५०

प्रसारणं लक्षयति विप्रकृष्टेति विप्रकृष्टेन संयोगस्तस्य हेतुः प्रसारणमित्यर्थः हेतुरित्युक्तौ वेगादावतिव्याप्ति
स्तद्वारणाय संयोगेति तावन्मात्रोक्ते अपक्षेपणादावतिव्याप्तिस्तद्वारणाय विप्रकृष्टेति भ्रमणादीनां गमनेनैवभूत
त्वादित्यभिप्रेत्याह गमनमित्यादि॥ सामान्यं लक्षयति नित्यमिति अनेकेष्वनुगतं समवेतमित्यर्थः एकमिति सामान्यस्व
रूपकथनं न तु लक्षणप्रविष्टमिति नित्यत्वे सत्यनेकसमवेतं सामान्यमित्यर्थः यथा सत्तादिः समवेतं सामान्य

विप्रकृष्टसंयोगहेतुः प्रसारणं अन्यत्सर्वं गमनं नित्यमेकमनेकानुगतं सामा
न्यं द्रव्यगुणकर्मवृत्ति परं सत्ता अपरं द्रव्यत्वादिः ॥

मित्युक्तौ रूपादावतिव्याप्तिस्तद्वारणायानेकेति तावन्मात्रोक्ते संयोगादावतिव्याप्तिस्तद्वारणाय नित्येति नित्यं सा
मान्यमित्युक्तौ परमाण्वादावतिव्याप्तिस्तद्वारणाय विशेष्यदलं अनेकसंबद्धमित्युक्तौ घटादात्यन्ताभावेऽतिव्याप्ति
स्तद्वारणाय समवेतमिति तदाश्रयमाह द्रव्येति द्रव्यं च गुणाश्च कर्म च द्रव्यगुणकर्माणि तेषु वृत्तिर्यस्य तदित्यर्थः प
रं अधिकदेशवृत्ति सामान्यं सत्ता सामान्यमित्यर्थः अपरं अल्पदेशवृत्ति सामान्यं द्रव्यत्वादि सामान्यमित्यर्थः ॥

विशेषलक्षणमाह नित्येति नित्यानि च तानि द्रव्याणि नित्यद्रव्याणि पृथिव्यादिचतुष्टयस्य परमाणवः आकाशा-
दिपंचकं चैतद्वृत्तिर्येषां ते नित्यद्रव्यवृत्तयः व्यावर्तका इत्यस्य स्वतो व्यावर्तका इत्यर्थः स्वस्मिन्नितरभेदसाधका न्व-
मिति जनकत्वस्य सत्वेवेत्यर्थः यथा अयं विशेष इतरेभ्यो भिद्यते विशेषान् समवायलक्षयति नित्येति तत्र संबंधस्य संबंवा-
यिभिन्नः संबंध्याश्रितः तथा च नित्यत्वे सति संबंधत्वं समवायत्वमित्यर्थः संबंधत्वमित्युक्ते संयोगे ऽतिव्याप्तिस्तद्वारणा-
य नित्येति तत्वावयुक्ते परमाणुद्वयोदावतिव्याप्तिस्तद्वारणाय संबंधत्वमिति समवायस्याश्रयमाह अयुतेति अयुतौ

नित्यद्रव्यवृत्तयो व्यावर्तका विशेषाः नित्यसंबंधः अयुतसिद्धवृत्तिः ययोर्द्वयोर्मध्ये एक-
मविनश्यदपराश्रितमेवावतिष्ठते तावयुतसिद्धौ यथावयवावयविनौ गुणगुणिनौ क्रि-
याक्रियावंतौ जातिव्यक्ती विशेषनित्यद्रव्ये चेति अनादिः सांतः प्रागभावः उत्पत्तेः पूर्वं का-

च तौ सिद्धावयुतसिद्धौ न युतौ वृत्तिर्ययोस्तथेत्यर्थः अयुतसिद्धलक्षणमाह ययोरिति अवयवावयविनोर्मध्ये एक
अवयवी विनाशावस्थामप्राप्नुवन्नवयवाश्रित एवावतिष्ठते तावयुतसिद्धावित्यर्थः एवं गुणगुणिनादिष्वा-
दिः प्रागभावं लक्षयति अनादिरिति अनादिरित्युक्ते आकाशावतिव्याप्तिस्तद्वारणाय सांत इति तावन्मात्रोक्ते घ-
टादावतिव्याप्तिस्तद्वारणाय उभयपदं प्रागभावे प्रमाणं च कपाले घटो भविष्यतीति प्रतीतेरेवेति उदाहरति उत्पत्तेरिति

ध्वंसं लक्षयति सादिरिति सादिरित्युक्ते घटादावतिव्याप्तिस्तद्वारणायानंतइति तावन्मात्रोक्तौ परमाण्वादाव
तिव्याप्तिस्तद्वारणाय सादिरपि ध्वंसे प्रमाणं च ध्वस्तः पटो नष्टः पट इत्यादि प्रतीतिरेवेति उदाहरति उत्पत्तीति कार्यस्य घटा
देरुत्पत्तेरनंतरं मुद्गरप्रहारादिना योऽभावः ध्वंस इत्यर्थः अत्यंताभावं निरूपयति त्रैकालिकेति त्रिषु कालेषु भवतीति त्रैका
लिको नित्य इत्यर्थः संसर्गावच्छिन्ना प्रतियोगिता यस्य स संसर्गावच्छिन्नाप्रतियोगिताकः संसर्गो नाम संबंधः

सादिरनंतः प्रध्वंसः उत्पत्त्यनंतरं कार्यस्य त्रैकालिकसं
सर्गावच्छिन्नप्रतियोगिताकोऽत्यंताभावः ॥

त्रैकालिकश्चासौ संसर्गावच्छिन्नप्रतियोगिताकः नित्यसंबंधावच्छिन्नप्रतियोगिताक इत्यर्थः अभावोऽत्यंताभा
वो इत्युच्यमाने अन्योन्याभावादावतिव्याप्तिस्तद्वारणाय संबंधावच्छिन्नेत्यादि तथापि प्रागभावादावतिव्याप्तिस्तद्वार
णाय नित्येति नित्यमात्रोक्तावाकाशादावतिव्याप्तिस्तद्वारणाय संसर्गेत्यादि एवमप्यन्योन्याभावेऽतिव्याप्तिरिति चेन्न
संबंधपदस्य संयोगसमवायवाचकत्वात् अन्योन्याभावस्य संबंधावच्छिन्नप्रतियोगित्वादिति ऽतिव्याप्तिरिति चेन्न

उदाहरति यथेति भूतलाधिकरणकसंयोगसंबंधावच्छिन्नप्रतियोगिताघटासंताभावोऽभावो यद्देशिकविशे
षणतासंबंधेनवर्त्ततेऽस्यार्थः अन्योन्याभावेतिरूपयतितादात्म्येति स चासौ स्वात्मा चेति तदात्मा तदात्मनो भावस्ता

यथा भूतले घटो नास्तीति तादात्म्यसंबंधा
वच्छिन्नप्रतियोगिताकोऽन्योन्याभावः ॥

दात्म्यं तच्चाप्यं तादात्म्येति संबंधस्तेनावच्छिन्नाप्रतियोगिता यस्य स तादात्म्यसंबंधावच्छिन्नप्रतियोगिताकोऽ
भावोऽन्योन्याभाव इत्यर्थः अभाव इति उक्ते अत्यंताभावादावतिप्रसंगस्तद्वारणाय संबंधेन्यादित्ताव सक्ते पिनैवे
वातिव्याप्तिस्तद्वारणाय तादात्म्येति ॥

उदाहरति यथेति स्वरूपसंबंधावच्छिन्नप्रतियोगिताकान्योन्याभाववानुयोगिवटइत्यर्थः ननुप्रमा
णप्रमेयेत्यादिप्राचीनसूत्रेषोडशपदार्थानामुक्तत्वात्कथंसप्तैवपदार्थाइत्यतआह सर्वेषामिति प्रमाणस्येंद्रिया
देर्द्रव्यादावंतर्भावआत्मादिरूपस्यप्रमेयस्यद्रव्यादावंतर्भावः संशयस्यज्ञानेंतर्भावः प्रयोजनस्यगुणादौदृष्टांत

सर्वेषामपिपदार्थानांयथायथमुक्तेष्वंतर्भावात्सप्तैवपदार्थाइतिसिद्धं काणादन्यायमतयोर्बालव्युत्पत्तिसिद्धयेऽ
न्नंभट्टेनविदुषारचितस्तर्कसंग्रहः इतितर्कसंग्रहःसमाप्तः ॥

स्यद्रव्यादौसिद्धांतस्यगुणादाववयवानांगुणेतर्कनिर्णयवादजल्पवितंडानांगुणेहेत्वाभासानांद्र
व्यादौछलजात्योरपिगुणेनिग्रहस्थानानामभावेद्रव्यादौवांतर्भाव एवमेतदंतर्भावसंभवात्सप्तैवपदार्थाइतिसिद्ध
मायथाग्रसिद्धांतसिद्धमित्यर्थः काणादस्यन्यायस्यतंत्रेतयोर्मतेतयोर्बालानांव्युत्पत्तिर्बालव्युत्पत्तिस्तस्याःसिद्धि
र्बालव्युत्पत्तिसिद्धिस्तस्यैइत्यर्थः इतिश्रीसंग्रहदीपिकायांसप्तपदार्थाःसमाप्ताः ॥

Tarkasangraha

(36)